TRIVANDRUM SANSKRIT SERIES.
No. CXXXI.
Śrī Citrodayamañjarī.
No. XX.

# THE VṚTTAVĀRTIKA

OF

Śrī Rāmapāṇivāda

EDITED BY

K. SAMBAŚIVA ŚĀSTRĪ

*Curator of the Department for the Publication of Oriental Manuscripts, Trivandrum.*

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1937.

(*All Rights Reserved.*)

अनन्तशयनसंस्कृतग्रन्थावलिः।

ग्रन्थाङ्कः १३१.

श्रीचित्रोदयमञ्जरी।

ग्रन्थाङ्कः २०.

श्रीरामपाणिवाद्विरचितं

# वृत्तवार्त्तिकम्

पौरस्त्यग्रन्थप्रकाशनकार्याध्यक्षेण

के. साम्बशिवशास्त्रिणा

संशोधितम्।

तच्च

अनन्तशयने

महोन्नतमहामहिमश्रीचित्रावतारमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम्।

कोलम्बाब्दाः १११२. क्रिस्ताब्दाः १९३७.

॥ श्रीः ॥

श्रीमूलावनिपालमौलिमणिना सङ्कल्पितश्रीरिव
श्रीमूलात्मजनिस्तथा सहजया लक्ष्म्या च सम्भावितः ।
स्वातिज्योतिरिवादितः समुदितश्चित्रावतारः स्वयं
मार्ताण्डाग्रसरो विराजति महाराजः स रामाभिधः ॥

भास्वद्वर्णमणिः प्रवालमृदुला श्रुत्याद्यलङ्कारिणी
श्रीमद्वञ्चिवसुन्धरानवयशोराशिप्रकाशात्मिका ।
उत्फुल्लत्सुकृतिप्रसाधनधृतामोदोन्नदड्डिण्डिमा
श्रीचित्रोदयमञ्जरी सुमनसां सर्वस्वमुज्जृम्भताम् ॥

के. साम्बशिवशास्त्री.

# PREFACE.

Vṛttavārttika is a rare attempt in the field of prosody and is of considerable help to students and scholars. In pursuance of the author's statement :—

'वृत्तानि यानि काव्यादौ सन्ति तानि प्रचक्ष्महे ।'

(पृ० १. श्लो० ५.)

this work has gained universal approbation as it purports a terse treatment of all the metres employed in Kāvya literature. The author strives for the exposition, especially for pupils, of non-vedic metres, grouped in the order of Prastāra without laying much stress upon the Vedic ones and this truth is expressed by himself in the following verse :

"बालानामुपयोगार्थं या कृता वृत्तकारिका ।
उदाहरणयोगेन सा मया पूरयिष्यते ॥"

(पृ० १.)

The work falls into two divisions, the text consisting of Kārikās and the commentary containing explanatory sentences illustrative of them. In the introductory verse beginning with बालानाम् the personal pronoun मया in the instrumental case may be held to be common to कृता and पूरयिष्यते and as such I conclude that both the Kārikās and the commentary owe their origin to the same individual. The frequent use of कश्चिद् in the exordial remarks to the first Kārikā introducing certain metres led me to infer that the reference is only to the humble author and to none else. If it meant otherwise the necessity of a commentary on the work would not have arisen as such import is derogatory to the dignity of the original.

Another work entitled रासक्रीडा is found embedded herein illustrating the metres in the order of Prastāra. This has four Paricchedas and towards the end 13 Kārikās are devoted to Prastāra:

'समान्यर्धसमान्यत्र विषमाणि च कानिचित् '

(पृ० १. श्लो० ५.)

'अनिर्दिष्टान्यसंज्ञत्वाद् वृत्तभेदं प्रचक्षते ।'

(पृ० २६. श्लो० ४२.)

"मात्रावृत्तानि कथ्यन्ते गणानां नियमं विना ।
कश्चितोऽपि स भूयिष्ठं प्रयोगेषु न दृश्यते ॥"

(पृ० ३२. श्लो० ६०.)

These verses explain briefly the nature of the metres based upon letters and syllabic instants:

"प्रस्तारितानि वृत्तानि बहुसंख्यानि सन्ति हि ।
तेषां संज्ञा न सर्वेषां प्रयोगोऽपि न दृश्यते ॥"

(पू० ३. श्लो० ६.)

'संज्ञावतां च सर्वेषां प्रयोगः प्रायिको यतः ।
अतः प्रयोगे साधूनामेव लक्षणमुच्यते ॥'

(पू० ४. श्लो० ७.)

Thus the work comes to a close by chalking out a useful path.

From the concluding verse of the work:

'विभाव्य वृत्तशास्त्राणि तेभ्यः संक्षिप्य चोद्धृतम् ।
रामेण पाणिवादेन तदेतद् वृत्तवार्त्तिकम् ॥'

(पू० ३८.)

it is evident that its originator is the eminent poet Rāmapāṇivāda. He might have been a disciple of Nārāyaṇa Bhaṭṭapāda of Melputtūr, the celebrated author of Nārāyaṇīya and other treatises and might have flourished in the latter half of the 16th century A. D. Some identify him with Kuñjan Nambiār who had written Maṇipravāḷam and other numerous works in Malayāḷam, but there are others who hold an entirely different view.

In case अनन्तधाम occurring in the following verse,

"अनन्तभक्तिप्रवणान्तरङ्गा-
    ननन्तरायार्जितपुण्यपूरान् ।
अनन्तवागर्णवकर्णधारा-
    ननन्तधाम्नः स्वगुरूनुपासे ॥"

is interpreted as one who had domiciled in Anantaśayana, the inference that Rāmapāṇivāda's preceptor was a resident of Trivandrum is correct.

His date may be deduced from Nārāyaṇa Bhaṭṭapāda's commentary on the Dhātukāvya as the latter half of the 16th century A. D. and so he must have lived much later than Nārāyaṇa Bhaṭṭapāda.

Other works by the author are the following:

१. विष्णुविलासः
२. राघवीयम्
३. मुकुन्दशतकम्
४. शिवशतकम्

५. श्रीकृष्णविलासव्याख्या (विलासिनी)

६. विष्णुविलासव्याख्या (विष्णुप्रिया)

७. राघवीयव्याख्या (बालपाठ्या)

८. धातुकाव्यव्याख्या (विवरणम् )

९. चन्द्रिका

१०. लीलावती

११. मदनकेतुचरितम्

१२. सीताराघवम्

१३. पञ्चतन्त्रम्

१४. प्राकृतसूत्रवृत्तिः

१५. कंसवधम् (प्राकृतकाव्यम् )

The only available manuscript used for this publication belongs to M. R. Ry. Nārāyaṇan Nārāyaṇan Eḷayatu Avl., Vembanāṭṭillam, Ambalappuzha, Travancore. It is about a hundred years old. Expressing the debt of gratitude I owe to the owner thereof, I deem it a great privilege to present this work, helpful to all lovers of Sanskrit Literature, to the enlightened public.

Trivandrum,<br>30-12-1112.

K. SĀMBAŚIVA ŚĀSTRĪ.

॥ श्रीः ॥

## निवेदना ।

---

इदं वृत्तवार्त्तिकं नाम किमप्यपूर्वप्रस्थानं निबन्धनं वृत्तविज्ञानसम्पादनकुतुकिनां विद्यार्थिनां न केवलं, व्युत्पन्नानामपि महत उपकाराय ।

'वृत्तानि यानि काव्यादौ सन्ति तानि प्रचक्ष्महे ।'

(पृ० ३. श्लो० ५.)

इति कक्ष्यमात्रदृष्टानां वृत्तानां सङ्गृह्य निरूपणपरमिदं ततोऽपि सर्वजनीनं सम्पद्यते । केवलप्रस्तारपरम्परापरिवृत्तानां वृत्तानामलौकिकच्छन्दोमन्दिरगतानां सम्भवमात्रतः प्रदर्शनायानायस्यतानेन वार्त्तिककारेण सुबहूपकृतं विशिष्य शिष्येभ्यो बालेभ्यः । तदिदं तत्त्वं स्वयमेवैवमुट्टङ्क्यते —

"बालानामुपयोगार्थं या कृता वृत्तकारिका ।
उदाहरणयोगेन सा मया पूरयिष्यते ॥"

(पृ० १.)

इति । अत्र कारिकाः, सोदाहरणानि विवरणवाक्यानि चेति द्वयी घटना दृश्यते । द्वयी च सा मन्ये काममेकप्रभवा, यद् — उपक्रमगते सम्प्रति समुद्धृते बालानामिति प्रतिज्ञाश्लोके मयेत्यस्मदा कारिकाया उदाहरणयोगेन पूरणायाश्चैकस्मिन्नस्मदि सामानाधिकरण्यं बोध्यते, प्रथमकारिकावतारिकायां 'कानिचिच्छन्दांसि विवेक्तुकामः कश्चिदि'ति दर्शनात् कश्चिदा परामृश्यमानो विनीताद् विवरणकारादनन्य एव कर्त्रेति प्रतिभाति, अन्यथा विवरणीयमूलकारिकाणामगौरवमापाद्यमानं विवरणोत्थानं न सहेत ।

अत्र वृत्तवार्त्तिके आनुष्टुभानि प्रस्तारक्रमागतान्युदाहरणानि प्रदर्शयन्ती रासक्रीडाप्रतिपादिका नाम्ना रासक्रीडाख्या काचिदन्यापि कृतिरन्तर्भवति । यत्र परिच्छेदाश्चत्वारोऽन्ते प्रस्तारक्रमश्च त्रयोदशभिः कारिकाभिर्घटिताः ।

'समान्यर्धसमान्यत्र विषमाणि च कानिचित् ।'

(पृ० ३. श्लो० ५.)

'अनिर्दिष्टान्यसंज्ञत्वाद् वृत्तभेदं प्रचक्षते ।'

(पृ० २६. श्लो० ४२.)

"मात्रावृत्तानि कथ्यन्ते गणानां नियमं विना ।
लक्षितोऽपि स भूयिष्ठं प्रयोगेषु न दृश्यते ।"

(पृ० १२. श्लो० ६०.)

इत्यादिभिः सङ्ग्रहकारिकाभिः समस्तमपि वृत्तशास्त्रबोधनीयं वस्तुजातं वर्णमात्रावृत्तात्मकं,

"प्रस्तारितानि वृत्तानि बहुसङ्ख्यानि सन्ति हि ।
तेषां संज्ञा न सर्वेषां प्रयोगोऽपि न दृश्यते ॥"

(पृ० ३. श्लो० ६.)

"संज्ञावतां च सर्वेषां प्रयोगः प्रायिको यतः ।
अतः प्रयोगे साधूनामेव लक्षणमुच्यते ॥"

(पृ० ४. श्लो० ७.)

इति दिशा साम्प्रतं सोपयोगं कथितमिति सद्यः सम्पूर्णमिदं निबन्धनम् ।

अस्य च निबन्धनस्य कर्ता कश्चिद् रामपाणिवादनामा महाकविरिति,

"विभाव्य वृत्तशास्त्राणि तेभ्यः संक्षिप्य चोद्धृतम् ।
रामेण पाणिवादेन तदेतद् वृत्तवार्त्तिकम् ॥"

(पृ० ३४.)

इति ग्रन्थान्तिमपद्येन ज्ञायते । स चायं रामपाणिवादः श्रीनारायणीयादिबहुप्रबन्धकर्तुः श्रीनवपुरग्रामवास्तव्यश्रीनारायणभट्टपादस्य शिष्य इति क्रिस्त्वब्दीयषोडशशतकोत्तरार्धजीवी कैश्चित् परिगण्यते । श्रीकृष्णचरितमणिप्रवालादिनैककैरलीयप्रबन्धनिर्मातुः कुञ्चन्संज्ञितादभिन्न इति केचिद् भिन्न इति परे चामुं नैकधा शङ्कन्ते ।

"अनन्तभक्तिप्रवणान्तरङ्गा-
ननन्तरायार्जितपुण्यपूरान् ।
अनन्तवागर्णवकर्णधारान्
अनन्तधाम्नः स्वगुरूनुपासे ॥"

(पृ० १.)

इति अनन्तधामपदेनानन्तशयननिवासिन इत्यप्यर्थस्वीकारे तु काममस्य गुरुचरणैरस्मदनन्तशयनमपि कदाचिदधिष्ठितं सम्भाव्यते । सर्वथा श्रीमन्नारायणभट्ट-

पादीयधातुकाव्यव्याख्यानादसौ क्रिस्त्वब्दीयषोडशशतकपूर्वार्धजीविनो भट्टपादादर्वाचीन इति निश्चप्रचम् ।

अस्य च कवेरन्याः काश्चन कृतयः सहृदयमान्याः प्रस्ताव्याः—

१. विष्णुविलासः ।

२. राघवीयम् ।

३. मुकुन्दशतकम् ।

४. शिवशतकम् ।

५. श्रीकृष्णविलासव्याख्या (विलासिनी) ।

६. विष्णुविलासव्याख्या (विष्णुप्रिया) ।

७. राघवीयव्याख्या (बालपाठ्या) ।

८. धातुकाव्यव्याख्या (विवरणम्) ।

९. चन्द्रिका ।

१०. लीलावती ।

११. मदनकेतुचरितम् ।

१२. सीताराघवम् ।

१३. पञ्चतन्त्रम् ।

१४. प्राकृतसूत्रवृत्तिः ।

१५. कंसवधम् (प्राकृतकाव्यम्) ।

अस्य च प्रसाधन उपयुक्ता मातृका निकाममद्वितीया वञ्चिराज्यान्तर्गत—अम्बलप्पुळवेम्पनाट्टिल्लुं श्रीमन्नारायणन्इळयतुस्वामिका माकी वत्सरशतकपर्युषिता । सदयमिमां प्रदायोपकृतवते ग्रन्थस्वामिने महतीं कृतज्ञतामनुस्मरन् संस्कृतभाषाप्रणयिसकलोपकारकमिदं वार्त्तिकं सद्यः सम्मुद्य सतां समक्षं समर्पयन्नस्मि स एव धन्यधन्यः ॥

अनन्तशयनम्,
३०–१२–११२.

के. साम्बशिवशास्त्री.

# विषयानुक्रमणी ।


| विषयः. | पृष्ठम्. |
|---|---|
| मङ्गलाचरणम् | १ |
| गणसङ्ख्या | ,, |
| गणानां साङ्केतिकनामकथनम् | २ |
| गणस्वरूपकथनम् | ,, |
| चिकीर्षितकथनम् | ३ |
| सहृदयचमत्कारकारिणामेव वृत्तानामत्र लक्षणकथनमिति प्रतिज्ञा | ४ |
| पथ्यावक्त्रलक्षणम् | ५ |
| प्रमाणिकाविद्युन्मालामाणवकानां लक्षणम् | ६ |
| चम्पकमालामत्तयोर्लक्षणम् | ७ |
| मनोरमोपेन्द्रवज्रेन्द्रवज्राणां लक्षणम् | ८ |
| उपजातिलक्षणम् | ९ |
| उपजातिभेदाः | १०,११ |
| भद्रिकासुमुख्योर्लक्षणम् | १२ |
| शालिनीरथोद्धतयोर्लक्षणम् | १३ |
| स्वागतामौक्तिकमालाश्रीवृत्तानां लक्षणम् | १४ |
| वंशस्थेन्द्रवंशाद्रुतविलम्बितानां लक्षणम् | १५ |
| तोटककुसुमचित्रभुजङ्गप्रयातनवमालिनीनां लक्षणम् | १६ |
| रथोद्धतगतिप्रमिताक्षरामणिमालानां लक्षणम् | १७ |
| महितोज्ज्वलास्रग्विणीमालतीप्रभाणां लक्षणम् | १८ |
| नवतामरसप्रहर्षिणीक्षमाचञ्चलीकावलीनां लक्षणम् | १९ |
| मत्तमयूरीरुचिरामञ्जुभाषिणीनां लक्षणम् | २० |
| वसन्ततिलकप्रहारकलिकेन्दुवदनानां लक्षणम् | २१ |
| शशिकलामालिनीशिखरिणीनां लक्षणम् | २२ |
| पृथ्वीहरिणीकटकानां लक्षणम् | २३ |

| विषयः. | | पृष्ठम्. |
|---|---|---|
| मन्दाक्रान्ताकौमुदीशार्दूलविक्रीडितानां | लक्षणम् | २४ |
| मेघविस्फूर्जितासुवदनास्रग्धराणां | ,, | २५ |
| वृत्तभेदस्य | ,, | २६ |
| द्रुतमध्यावेगवत्युपचित्राणां | ,, | २७ |
| अपरवक्त्रापुष्पिताग्रावैतालीयवसन्तमालिकानां | ,, | २८ |
| हरिणप्लुताभद्राविराड्द्रुतानां | ,, | २९ |
| उपस्थितप्रचुपितामृतधारयोः | ,, | ३० |
| पादान्ते गुरुलघुव्यवस्था | | ३१ |
| आर्यालक्षणम् | | ३२ |
| गीत्युपगीत्युद्गीत्यार्यागीतीनां लक्षणम् | | ३३ |

॥ श्रीः ॥

श्रीरामपाणिवादविरचितं

# वृत्तवार्त्तिकम् ।

---

अनन्तभक्तिप्रवणान्तरङ्गा-
ननन्तरायार्जितपुण्यपूरान् ।
अनन्तवागर्णवकर्णधारा-
ननन्तधाम्नः स्वगुरूनुपासे ॥

बालानामुपयोगार्थं या कृता वृत्तकारिका ।
उदाहरणयोगेन सा मया पूरयिष्यते ॥

इह तावत् पिङ्गलादिभिराचार्यैर्निबद्धानां लौकिकानां वर्णमात्राविभागभाजां छन्दसां प्रपञ्चेषु काव्यादिप्रयोगसोपयोगानि कानिचिच्छन्दांसि विवेक्तुकामः कश्चिदात्मगुरुपरदैवतानुस्मरणपूर्वकमारिप्सितं प्रतिजानीते —

**गुरुपादान् नमस्कृत्य हेरम्बं भारतीमपि ।**
**क्रियते पद्यबन्धानां वृत्तलक्षणकारिका ॥ १ ॥**

कारिका नाम लक्षणवाक्योपपादकः श्लोकसङ्घातः ।

अथ गणसङ्ख्यामुपन्यस्यति —

**अष्टौ सन्ति गणास्ते तु वर्णत्रिकतया मिताः ;**

गुर्वात्मकवर्णत्रयप्रस्तारवर्धिता ह्यष्टौ प्रकारभेदा गणा इत्युच्यन्ते ।

G. P. T 844. 500. 22-5-112. 1B

तेषां च प्रत्येकं साङ्केतिकं नाम प्रस्तौति —

**मगणो भगणश्चैव जगणः सगणस्तथा ॥ २ ॥**

**नगणो यगणश्चैव रगणस्तगणस्तथा ।**

अमीषां तु गुरुत्वलघुत्वभेदेन भेदाः । तदाहुः—

"सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।

वा पादान्तस्त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको ल् ऋजुः ॥"

इति । अस्यार्थः—अनुस्वारवान् दीर्घवान् विसर्गान्तः संयोगपरश्च यो वर्णः सः गः स्यात् गुरुः स्यादित्यर्थः । वक्रसंज्ञश्च स्यात् । पादान्तगतस्तु वर्णो विकल्पेन गुरुसंज्ञः स्यात् । उक्तलक्षणादन्यस्तु मात्रिक एकमात्रो वर्णो लः स्यात् लघुः स्यादित्यर्थः । ऋजुसंज्ञश्च स्यादिति । अत्र वक्रऋजुसंज्ञाफलं तु प्रस्तारलेखाविन्यासरूपमिति बोध्यम ॥

**गुरोर्ग इति वा संज्ञा लघोर्ल इति वा भवेत् ॥ ३ ॥**

यथायोग्यं गुरुर्ग इति वा लघुर्ल इति वा प्रयोक्ष्यते इत्यर्थः ॥

अथ गणानां स्वरूपमाह —

**त्रिगो म आदिगो भः स्यान्मध्यगो जोऽन्त्यगस्तु सः ।**

**त्रिलो न आदिलो यः स्यान्मध्यलो रोऽन्त्यलस्तु तः ॥**

त्रयो गा गुरवो यस्य स त्रिगः । एवं त्रिल इत्यादि । एवं च गुरुत्रयात्मको मगणः । आदिगुरुर्भगणः । मध्यगुरुर्जगणः । अन्त्यगुरुः सगणः । लघुत्रयात्मको नगणः । आदिलघुर्यगणः । मध्यलघू रगणः । अन्त्यलघुस्तगण इति सिद्धम् ॥

अथ चिकीर्षितमाह —

**समान्यर्धसमान्यत्र विषमाणि च कानिचित् ।**
**वृत्तानि यानि काव्यादौ सन्ति तानि प्रचक्ष्महे ॥ ५ ॥**

समानीति । तदाहुः —

"अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ।
तच्छन्दःशास्त्रतत्त्वज्ञाः समवृत्तं प्रचक्षते ॥"

इति । अर्धसमानीति । तच्चाहुः—

"प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद् वृत्तं तदर्धसममुच्यते ॥"

इति । विषमाणीति । तदप्याहुः —

"यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥"

इति । अत्र च यानि समानि यानि चार्धसमानि काव्यादौ सन्ति तानि वृत्तानि प्रचक्ष्महे । यानि तु विषमाणि तानि कानिचित् प्रचक्ष्मह इत्यन्वयः । विषमाणां हि प्रयोगवैकल्यात् तान्यल्पशः प्रचक्ष्मह इत्यर्थो यथा स्यात् । काव्यादावित्यादिशब्देन नाटकतोटकादयो गृह्यन्ते । विषमाणीत्यनेनैव प्रायशश्चरणेषु भिन्नलक्षणानामार्यादीनां मात्रावृत्तानामपि स्वीकारः ॥

**प्रस्तारितानि वृत्तानि बहुसंख्यानि सन्ति हि ।**
**तेषां संज्ञा न सर्वेषां प्रयोगोऽपि न दृश्यते ॥ ६ ॥**

प्रस्तारितानीति ।

"पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः ।
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥
ऊने दद्याद् गुरूनेव यावत् सर्वलघुर्भवेत् ।"

इति लक्षितरीत्या वर्धितानीत्यर्थः ॥

कृतसंज्ञान्यपि सर्वाणि न सहृदयचमत्कारकारीणीत्याह —

**संज्ञावतां च सर्वेषां प्रयोगः प्रायिको यतः ।**
**अतः प्रयोगे साधूनामेव लक्षणमुच्यते ॥ ७ ॥**

छन्दांसि तावत् षड्विंशतिः —

"उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥
त्रिष्टुप् च जगती चैव तथातिजगती मता ।
शक्करी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते ॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः संकृतिश्चैव प्रोक्ताभिकृतिरुत्कृतिः ॥"

इति ॥

एषां छन्दसां मध्ये अनुष्टुभमारभ्यैव प्रदर्शयामीत्याह—

**अनुष्टुबादिच्छन्दांसि लौकिकान्येव भूयशः ।**
**नाम्ना यत्या च कथ्यन्ते निर्देशक्रमतो गणैः ॥ ८ ॥**

अनुष्टुबादीति । ततोऽधस्तनानामलौकिकत्वाल्लक्षणाभिधानमनतिप्रयोजनम् । उपरितनानामपि प्रकृत्यन्तमेवाययमारम्भः । वक्ष्यति च—

"आकृत्यादावप्रयोगबाहुल्यात् तत्र न क्रमः ।"

इति । नाम्नेति । पथ्यावक्त्रं प्रमाणिका विद्युन्मालेत्यादिव्यपदेशेनेत्यर्थः । यत्येति । यतिः पदच्छेदः । तदुक्तं—

"श्लोकेषु नियतस्थानं पदच्छेदं यतिं विदुः ।"

इति । निर्देशक्रमत इति । कारिकासु येन क्रमेण गणा निर्दिश्यन्ते तेनैव क्रमेण लक्ष्येषु निक्षिप्यन्त इत्यर्थः । यथा—"मनोरमा नरजगैरि"ति निर्देशे नगणात् परं रगणः ततः परं जगणः ततः परं गुरुरित्यादिक्रमेण गणविन्यासः ॥

अथानुष्टुप्छन्दः प्रारभ्य वृत्तलक्षणानि प्रणिबध्नाति—

**ओजे मो रो गुरुद्वन्द्वं युग्मे मो रो लगावपि ।**
**पथ्यावक्त्रं त्विदं वृत्तं भेदो भूयाननुष्टुभि ॥ ९ ॥**

ओज इति प्रथमतृतीयादयो विषमसङ्ख्याः । तदुक्तम् —

"अयुगोजाख्यं विषमं स्थानं युग्युग्मसंज्ञकं तु समम् ।"

इति । ओजे प्रथमे तृतीये च पादे मगणरगणौ गुरुद्वयं च, युग्मे द्वितीये तुरीये च पादे मगणरगणौ लघुर्गुरुश्च यत्र क्रमेण विन्यस्यन्ते तत् पथ्यावक्त्रं नाम वृत्तम् । भेदो भूयानिति । समवक्त्रार्धसमवक्त्रविषमवक्त्रयुग्मविपुलादिभेदेनानुष्टुभानि वृत्तानि बहुधा भिद्यन्ते । किन्तु विस्तरभयादतिप्रयोजनाभावाच्च न प्रदर्श्यन्ते इति भावः । पथ्यावक्त्रस्योदाहरणं स्वयमेव कारिकाश्लोकः । इदमत्रोदाहरणान्तरं—

"वेदा वाचः प्रसन्नानां दृष्टेर्दानं त्वनुग्रहः ।
येषां वासः पदं मुक्तेरीडे तानेव भूसुरान् ॥"

नन्वत्रोद्देशक्रमभङ्गः प्राप्नोति । समान्यर्धसमानि विषमाणि चेति प्रक्रम्यार्धसमस्य प्रथमं प्रदर्शितत्वादिति चेत् । मैवम् । अनुष्टुभ एव प्रथममुपक्रान्तत्वेन तदन्तःपातिनोऽर्धसमस्यापि तावदवसरप्राप्तत्वेनापरिहार्यत्वात् ॥

अथानुष्टुभ्येव समकक्ष्याविष्टां प्रमाणिकां लक्षयति —

**प्रमाणिका जरौ लौ गः**

यत्पादे जगणरगणौ लघुर्गुरुश्च, सा प्रमाणिका नाम । यथा—

"स्मरान्धकारघस्मरं स्मरान्तकस्य विग्रहम् ।
स्मरान्तरान्तरा मनः स्थिरं तदेव नापरम् ॥"

**विद्युन्माला ममौ गगौ ।**

नन्वत्र सरूपयोर्मकारयोर्गकारयोश्चैकशेषः कस्मान्न भवति । उच्यते । अविवक्षितत्वात् । वक्तुर्विवक्षापूर्विका हि शब्दप्रवृत्तिः । अथवा स्पष्टार्थः । तदुक्तं —

"एकशेषमनादृत्य क्वचित् स्पष्टार्थसिद्धये ।
सरूपाणामपि द्वन्द्वं छान्दसीयाः प्रयुञ्जते ॥"

इति । यत्पादे मगणद्वयं गुरुद्वयं च सा विद्युन्माला नाम यथा—

"विद्युन्मालालोलान् भोगान् मुक्त्वा मुक्तौ यत्नं कुर्याः ।
ध्यानोत्पन्नं निस्सामान्यं सौख्यं भोक्तुं यद्याकाङ्क्षेत ॥"

**भतौ लगौ माणवकं**

यत्पादे भगणतगणौ लघुर्गुरुश्च तन्माणवकं नाम । यथा —

"वारवधूकेलिमयीं वागुरिकां प्राप्य जनः ।
मारकिरातास्त्रहतो माररिपो ! वारय तम् ॥"

अथानुष्टुप्प्रकरणमुपसंहरति —

**एतावानत्र विस्तरः ॥ १० ॥**

इति ॥

अथालौकिकप्रायवृत्तां बृहतीमतिक्रम्य गच्छन्नाह —

**बृहत्यां न प्रयोगार्हं वृत्तं पङ्क्त्यां तु कथ्यते ।**

अनर्हत्वं तु श्रोतॄणामहृदयावर्जकत्वम । पङ्क्तिर्नाम दशाक्षरपादं छन्दः ॥

**अस्ति चम्पकमालाख्यं भमसा गः शरैः शरैः ॥ ११ ॥**

शरैरिति लौकिकसंख्यया विरामनिर्देशः । तदुक्तं —
"रुद्रादिसमुद्रादिर्लोकाद् विषयोचितोऽवधार्योऽत्र ।"
इति । भगणमगणसगणगुरुभिरुपलक्षिता पञ्चभिः पञ्चभिर्वर्णैर्विरामवती चम्पकमाला नाम । यथा —

"अन्यगुणौघे सत्यपि येषा-
मच्युतभक्तिश्चेतसि नास्ते ।
संप्रति तेषामाद्रियते क-
श्चम्पकमालां भृङ्गवदीहाम् ॥"

**युगै रसैः परिच्छिन्ना मत्ता स्यान्मभसा गुरुः ।**

यत्पादे मगणभगणसगणगुरवः स्युः, सा चतुर्भिः षड्भिर्विरामवती मत्ता नाम । यथा —

"लीलारामे कलकलकूज-
ल्लोलम्बालीशुककलकण्ठे ।

धन्यो मन्ये सह रमणीभिः
सान्द्रानन्दं नयति वसन्तम् ॥”

**मनोरमा नरजगैः**

नगणरगणजगणगुरुभिरुपलक्षिता मनोरमा नाम । **यथा —**

“हरिपदाम्बुजादुदेयुषी
हरजटाटवीमुपेयुषी ।
दुरितहारिणी शरीरिणा-
ममरवाहिनी पुनातु वः ॥”

एवंविधेष्वनुक्तयतिस्थानेषु पदान्ते यतिरिति बोध्यम् ॥

**अथ त्रिष्टुभ्युपक्रमः ॥ १२ ॥**

उपक्रमः प्रस्तावः । अनेन तत्रानतिसंक्षेपः सूचितः । त्रिष्टुब् नाम एकादशाक्षरपादं छन्दः ॥

**उपेन्द्रवज्रा कथिता जतजेभ्यो गुरुद्वयम् ।**

यत्पादे जगणस्तगणो जगणो गुरुद्वयं च, सेयमुपेन्द्रवज्रा नाम । यथा —

“सरोजिनीमानमरागवृत्ते-
रनर्कसम्पर्कमतर्कयित्वा ।
मदन्यदानं प्रति शङ्कितेय-
महो महीयस्तव साहसिक्यम् ॥”

**ततजेभ्यो गुरुद्वन्द्वमिन्द्रवज्राभिधीयते ॥ १३ ॥**

यत्पादे तगणद्वयं जगणो गुरुद्वयं च, सेयमिन्द्रवज्रा नाम । यथा —

"आकीटमाकैटभवैरि तुल्यः
स्वाभीष्टलाभात् कृतकृत्यभावः ।
भिन्नस्पृहाणां प्रति चार्थमर्थं
द्विष्टत्वमिष्टत्वमपव्यवस्थम् ॥"

अथानयोः सङ्करेषूपजातय इत्याह—

**अनयोरादिजतयोः कामचारप्रयोगयोः ।**
**चतुर्दशप्रकाराः स्युः सङ्करादुपजातयः ॥ १४ ॥**

अनयोरुपेन्द्रवज्रेन्द्रवज्रयोः आदिभूतयोर्जगणतगणयोः कामचारो यथेष्टप्रयोगो ययोस्तयोः सङ्करात् चतुर्दशप्रकारा उपजातयो नाम स्युः । तत्र तावत् पूर्वार्धे जावुत्तरार्धे तौ यथा —

"अथात्मनः शब्दगुणं गुणज्ञः
पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां
रामाभिधानो हरिरित्युवाच ॥"

तद्वैपरीत्येन यथा —

"पूर्वानुभूतं स्मरता च यत्र
कम्पोत्तरं भीरु ! तवोपगूढम् ।
गुहाविसारीण्यतिवाहितानि
मया कथञ्चिद् घनगर्जितानि ॥"

प्रथमपादे तः, शेषपादत्रये जा यथा —

"बन्धाभ्यनानाविधमल्लयुद्ध-
प्रमोदितैः केलिवने मरुद्भिः ।

प्रसूनवृष्टिं पुनरुक्तमुक्तां
प्रतीच्छतं भैमि ! युवां युवानौ ॥"

तद्वैपरीत्येन यथा —

"अथोपगूढे शरदा शशाङ्के
प्रावृड् ययौ शान्ततडित्कटाक्षा ।
कासां न सौभाग्यगुणोऽङ्गनानां
नष्टः परिभ्रष्टपयोधराणाम् ॥"

प्रथमतृतीययोस्तः, द्वितीयचतुर्थयोर्जो यथा —

"अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ वारिनिधी विगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥"

तद्वैपरीत्येन यथा —

"तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोशजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः ॥"

प्रथमद्वितीयचतुर्थेषु जस्तृतीये तो यथा —

"अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः ॥"

तद्वैपरीत्येन यथा —

"तं भूपतिर्भासुरहेमराशिं
लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव
पादं सुमेरोरिव वज्रभिन्नम् ॥"

प्रथमचतुर्थयोस्तः, द्वितीयतृतीययोर्जो यथा —

"सप्तच्छदक्षीरकटुप्रवाह-
मसह्यमाघ्राय मदं तदीयम् ।
विलङ्घिताधोरणतीव्रयत्नाः
सेनागजेन्द्रा विमुखीबभूवुः ॥"

तद्वैपरीत्येन यथा —

"प्रचेतसा मे प्रहितैरुदारैः
षाण्मासिकैरिन्दुकरावदातैः ।
मुक्ताफलैर्गुम्भित एष हारो
विना क्व विश्राम्यतु ते स्तनाभ्याम् ॥"

प्रथमद्वितीयतृतीयेषु जश्चतुर्थे तो यथा —

"जगाद चैनामयमङ्गराजः
सुराङ्गनाप्रार्थितयौवनश्रीः ।
विनीतनागः किल सूत्रकारै-
रैन्द्रं पदं भूमिगतोऽनुभुङ्क्ते ॥"

तद्वैपरीत्येन यथा —

"पाण्ड्योऽयमंसार्पितलम्बहारः
क्लृप्ताङ्गरागो हरिचन्दनेन ।

आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः ॥"

प्रथमतृतीयचतुर्थेषु जो द्वितीये तो यथा —

"इति स्वसुर्भोजकुलप्रदीपः
सम्पाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिश्रीः ॥"

तद्वैपरीत्येन यथा —

"तिस्रस्त्रिलोकप्रथितेन सार्ध-
मजेन मार्गे वसतीरुषित्वा ।
तस्मादपावर्तत कुण्डिनेशः
पर्वात्यये सोम इवोष्णरश्मेः ॥"

इत् ।

उपजातयः समाप्ता इत्यर्थः ॥

**ननौ रलौ गुरुर्यत्र भद्रिका नाम सा भवेत् ।**

यत्र नगणद्वयं रगणो लघुर्गुरुश्च सा भद्रिका नाम ।

यथा —

"दशमुखकुलदात्रपात्रकं
दशरथकुलमौलिमण्डनम् ।
करधृतशरकार्मुकं भजे
कमपि तममितप्रभं विभुम् ॥"

**नगणाज्जगणद्वन्द्वे सुमुखी नाम सा लगौ ॥ १५ ॥**

स्पष्टम् । यथा —

“मम हृदये सततं स्फुरतात्
तनुरतसीकुसुमप्रतिमा ।
व्रजतरुणीनयनोत्सवदा
नरकरिपोरमला सुमुखी ॥”

**भगणत्रयसंयुक्तं दोधकं गुरुयुग्मभाक् ।**

स्पष्टम् । यथा —

“इत्थममुं विलपन्तममुञ्चद्
दीनदयालुतयावनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं
गच्छ यथेच्छमथेत्यभिधाय ॥”

‘पादान्तस्थं विकल्पेने’ति वचनादत्र चतुर्थपादान्ताक्षरस्य लघुत्वेऽपि न लक्षणदोषः ॥

**शालिनी मततेभ्यो गौ विरतिर्युगवाजिभिः ॥ १६ ॥**

यत्पादे मगणस्तगणद्वयं गुरुद्वयं च सा चतुर्भिः सप्तभिर्विच्छिन्ना शालिनी नाम । यथा —

“वीचीवातैः शीकरक्षोदशीतै-
राकर्षद्भिः पद्मकिञ्जल्कगन्धान् ।
मोहे मोहे रामभद्रस्य जीवं
स्वैरं स्वैरं प्रेरितैस्तर्पयेति ॥”

**रेफो नकारो रेफश्च लगौ चेयं रथोद्धता ।**

स्पष्टम् । यथा —

"तावदित्थमथ भीमनन्दनां
दारसारमधिगम्य नैषधः ।
तां तृतीयपुरुषार्थवारिधेः
पारलङ्घनतरीमरीरमत् ॥"

**रनभा गुरुयुग्मं च स्वागतेति निगद्यते ॥ १७ ॥**

यथा —

"नैव नः प्रियतमोभयथासौ
यद्यमुं न वृणुते वृणुते वा ।
एकतो हि धिगमूमगुणज्ञा-
मन्यतः कथमदःप्रतिलम्भः ॥"

**अथ मौक्तिकमाला तु नयभेभ्यो गुरुद्वयम् ।**

स्पष्टम् । यथा —

"कलकलकाञ्चीकङ्कणजालं
मधुरविहारं मानसचोरम् ।
कमपि पुमांसं कामसमानं
नवघननीलं बालमुपासे ॥"

**भतनेभ्यो गुरुद्वन्द्वं श्रीवृत्तं त्विन्द्रियै रसैः ॥ १८ ॥**

तुशब्दोऽत्र मौक्तिकमालातो वैपरीत्यद्योतकः । अत्र पञ्चभिः षड्भिर्विच्छेदः । यथा —

"वंशनिनादैरमृतसमानै-
राहृतचित्तं निखिलजनानाम् ।

गोपवधूटीकुचघुसृणाङ्क-
श्रीमदुरस्कं नमत कुमारम् ॥"

अथ द्वादशाक्षरपादां जगतीं लक्षयितुमाह —

**जगत्यामथ कथ्यन्ते पद्यवृत्तानि कानिचित् ।**

**जतौ जरौ च वंशस्थं**

जगणतगणाभ्यां परौ जगणरगणौ यत्र, तद्वंशस्थं नाम ।

यथा —

"श्रियःपतिः श्रीमति शासितुं जग-
ज्जगन्निवासो वसुदेवसद्मनि ।
वसन् ददर्शावतरन्तमम्बरा-
द्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥"

**इन्द्रवंशा ततौ जरौ ॥ १९ ॥**

यथा —

"गोपालबालस्य कलिन्दनन्दिनी-
तीरेषु सञ्चारयतो गवां कुलम् ।
राधापरीरम्भसमुत्सुकात्मनो
मार्गे विलम्बो मुदमातनोतु वः ॥"

**नभाभ्यां च भराभ्यां च युक्तं द्रुतविलम्बितम् ।**

यथा —

"जनयति त्वयि वीर! दिशां पती-
नपि गृहाङ्कणमात्रकुटुम्बिनः ।

रिपुरिति श्रुतिरेव न वास्तवी
प्रतिभयोन्नतिरस्तु कुतस्तु नः ॥"

**ससाभ्यां च ससाभ्यां च युक्तं तोटकमुच्यते ॥ २० ॥**

यथा —

"अथ जाम्बवदङ्गदनीलनलै-
रपरैरपि वानरवीरभटैः ।
सहितः स हितैरहितान्तकरः
प्रययावभिविन्ध्यमवन्ध्यगतिः ॥"

**वृत्तं कुसुमचित्राख्यं नयाभ्यां चेत् परौ नयौ ।**

यथा —

"अखिलरसानामविकलधाम्ना-
ममृतसमानाममितसुखानाम् ।
स्मरतरलानामिव तरुणीनां
कविभणितीनां क इव वितृप्येत् ॥"

**याभ्यां याभ्यां भुजङ्गप्रयातमित्यभिधीयते ॥ २१ ॥**

यगणचतुष्कयुक्तं भुजङ्गप्रयातं नाम ।

यथा—

"प्लवङ्गप्रवीरावसङ्ग्राममध्येता-
मभङ्गाभिमानप्रसङ्गातिघोरम् ।
नदन्तौ गभीरं मदं तौ वहन्तौ
बृहन्ताविवाशान्तदन्तावलौ द्वौ ॥"

**नजाभ्यां च भयाभ्यां च सहिता नवमालिनी ।**

यथा—

“नमत नवाम्बुवाहमिव नीलं
तडिदुपमानपीतनवचेलम् ।
सुरपतिचापचारुवनमालं
धृतकरुणामृतं कमपि बालम् ॥”

**जसाभ्यां च जसाभ्यां च रथोद्धतगतिर्मता ॥ २२ ॥**

यथा —

“सरागसुमना मरालगमना
परीतमदना सरोजवदना ।
उदाररचना मनोज्ञवचना
स्मरेण जनिता मदीयवनिता ॥”

**सजाभ्यां च ससाभ्यां च सहिता प्रमिताक्षरा ।**

यथा—

“रुचिराकृतिः कनकसानुमथो
परमः पुमानिव पतिं पतताम् ।
धृतसत्पथस्त्रिपथगामभितः
स तमारुरोह पुरुहूतसुतः ॥”

**तयाभ्यां च तयाभ्यां च मणिमाला रसै रसैः ॥ २३ ॥**

अत्र षड्भिः षड्भिर्विच्छेदः। यथा —

“गङ्गाफणिमालाबालेन्दुकलाभि-
स्तुङ्गामलशोभं कोटीरभरं ते ।
अङ्गारपिशङ्गं नेत्रं च ललाटे
गङ्गाधर ! शम्भो ! ध्यायाम्यनिशं भोः ” ॥

ननाभ्यां च भराभ्यां च सहिता महितोज्ज्वला ।

यथा--

"यतिभिररहिते यमुनातटे
कुहचन वनितानिकरावृते ।
समरसवसतिः कमलापति-
र्गमयति समयं स महामतिः ॥"

रराभ्यां च रराभ्यां च स्रग्विणी नाम गद्यते ॥ २४ ॥

यथा—

"गोरसं चोरयन् गोपिकामन्दिरे
गोकुलं पालयन् गोपबालैः समम् ।
केकिपिञ्छोल्लसत्केशपाशो हरिः
सन्ततं सञ्चरेदन्तरङ्गे स मे ॥"

नजाभ्यां च जराभ्यां च मालतीवृत्तमुच्यते ।

यथा —

"धनजनयौवतलोभयन्त्रितो
विफलयसे किमु जन्म दुर्मते ! ।
मुनिजनशोभिनि जाह्नवीतटे
निवस सुखं निजबन्धमुक्तये ॥"

ननाभ्यां च रराभ्यां च प्रभा स्यान्मुनिभिः शरैः ॥ २५ ॥

अत्र सप्तभिः पञ्चभिर्विरामः । यथा —

"मृगपरशुधरं मृडानीयुतं
शशिरुचिरजटं शमस्यास्पदम् ।

स्फटिकमणिनिभं फणीन्द्राञ्चितं
प्रणम मम मनः! पशूनां पतिम् ॥"

नजाभ्यां च जयाभ्यां च नवतामरसं विदुः ।

यथा—

"सकृदपि मज्जनमम्बरनद्यां
सुकृतवतापि सुदुर्लभमाहुः ।
ननु यतनीयममुत्र यतः स्या-
दचलसुतापतिरूपसरू(पः ? पम्) ॥"

अथ त्रयोदशाक्षरपादामतिजगतीं प्रस्तुवन्नाह—

ततश्चातिजगत्यां तु ब्रूमो वृत्तानि कानिचित् ॥ २६ ॥

मनौ जरौ गुरुर्यत्र गुणैर्दिग्भिः प्रहर्षिणी ।

अत्र त्रिभिर्दशभिर्विरामः । यथा—

"सत्रान्ते सचिवसखः पुरस्क्रियाभि-
र्गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान् स्वपुरनिवृत्तयेऽनुमेने ॥"

तुरगर्तुविरामा तु क्षमा ननतता गुरुः ॥ २७ ॥

अत्र सप्तभिः षड्भिर्विरामः । यथा—

"ज(ग ? य)ति गुणनिधिर्जानकीवल्लभो
जगति गतिरयं जीवसन्धारिणाम् ।
भजनमजनुषः कारणं यद्विभोः
सुजनमहितयोस्तस्य पादाब्जयोः ॥"

षमौ ररौ गुरुर्यत्र चञ्चलीकावली तु सा ।

यथा—

"मुरारातेर्वक्षो मुग्धजीमूतनीलं
निराकुर्वाणायाः कुत्र ते लक्ष्मि! सौख्यम् ।
निकेते नीचानां निष्ठुरे सक्तिमत्या
भवत्या दौश्शील्यं हन्त नाद्यापि शान्तम् ॥"

मगणस्तगणो यत्र यगणः समणो गुरुः ॥ २८ ॥
तत्तु मत्तमयूरीति वृत्तं वेदैर्ग्रहैर्यतिः ।

चतुर्भिर्नवभिर्विच्छेदः । यथा—

"मध्येमार्गं मत्तमयूरीरवरम्यं
संरुद्धार्कं सत्फलपुष्पैस्तरुसङ्घैः ।
उत्कूलापैः कूपतटाकैरुपपन्नं
मार्गश्रान्ताः स्फीतमरण्यं ददृशुस्ते ॥"

युगैर्ग्रहैः परिच्छिन्ना रुचिरा जभसा जगौ ॥ २९ ॥

अत्र चतुर्भिर्नवभिश्छेदः । यथा—

"अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयम् ॥"

सजौ सजौ गुरुर्यत्र सा भवेन्मञ्जुभाषिणी ।

यथा—

"परिपाण्डुदुर्बलकपोलसुन्दरं
दधती विलोलकबरीकमाननम् ।

करुणस्य मूर्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी ॥"

अथ चतुर्दशाक्षरपादायां शक्वर्यां वृत्तत्रयं प्रवर्तयति --

शक्वर्यां तभजा जो गौ वसन्ततिलकं मतम् ॥ ३० ॥

यत्र तगणभगणौ जगणद्वयं गुरुद्वयं च, तद् वसन्ततिलकं नाम । यथा —

"श्यामावदातमरविन्ददलायताक्षं
बन्धूकपुष्परुचिराधरपाणिपादम् ।
सीतासहायमजितं धृतचापबाणं
रामं नमामि शिरसा रमणीयवेषम् ॥"

ननौ भनौ लगौ यत्र प्रहारकलिका हि सा ।

प्रहरणकलिकेति च मतान्तरम् । यथा —

"अखिलतनुभृतामभयदमनिशं
फणिगणवलयं शितपरशुधरम् ।
अतिसितभसितैरविकलशिवदं
हरकरकमलं प्रणमत विमलम् ॥"

अथेन्दुवदना यत्र भजसा नो गुरुद्वयम् ॥ ३१ ॥

यथा —

"शश्वदुदयस्थितिलयप्रभुरमेयो
मिश्रितवपुर्गिरिजया कुचनताङ्ग्या ।
विश्वजनवन्द्यचरणाम्बुरुहयुग्मो
दुरशकुनदोषमपहन्तु मम शम्भुः ॥"

अथ पञ्चदशाक्षरपादामतिशक्वरीमवतारयति —

इदानीमतिशक्वर्यां वृत्तद्वयमिहोच्यते ।
नानाभ्यां ननसैश्चापि युक्ता शशिकला किल ॥ १२ ॥

नगणचतुष्केण सगणेन च युक्ता शशिकला नाम ।

यथा —

"कलकलमुखरितमणिमयवलयं
पुलकिततनु घनमनसिजविसरम् ।
श्रमजलकणगणपरिमिलदलकं
मधुरिपुनिधुवनमनुभव सुभगे ! ॥"

ननौ मयौ यकारश्च मालिनी वसुवाजिभिः ।

अत्राष्टभिः सप्तभिर्विरामः । यथा —

"किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविचलितकपोलं जल्पतोरक्रमेण ।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेवं व्यरंसीत् ॥"

न चास्मिन्नुदाहरणे द्वितीयपादान्ते यगणो न दृश्यते, जगण एव दृश्यत इति लक्षणभङ्गः शङ्क्यः । 'वा पादान्त' इति परिभाषितत्वात् ॥

अथालौकिकमायवृत्तामष्टिमतिक्रम्य गच्छन्नाह —

अष्ट्यामलौकिकं वृत्तमत्यष्ट्यां तावदुच्यते ॥ १३ ॥

अत्यष्टिर्नाम सप्तदशाक्षरपादं छन्दः ॥

ऋतुरुद्रैः शिखरिणी यमौ नसभला गुरुः ।

षड्भिरेकादशभिरत्र विच्छेदः । यथा —

"बहिः सर्वाकारप्रवणरमणीयं व्यवहरन्
पराभ्यूहस्थानान्यपि तनुतराणि स्थगयते ।
जनं विद्वानेकः सकलमतिसन्धाय कपटै-
स्तटस्थः स्वानर्थान् घटयति च मौनं च भजते ॥"

**वसुग्रहयतिः पृथ्वी जसौ जसयला गुरुः ॥ ३४ ॥**

अत्राष्टभिर्नवभिश्छेदः । यथा —

"प्रिये ! जनकनन्दिनि ! प्रकृतिपेशलामीदृशीं
कथं ग्लपयितुं सहे तव शिरीषमृद्वीं तनुम् ।
गृहीतहरिणीगणत्रिकविसारिनानासिरा-
क्षतिक्षरितशोणितारुणवृकानने कानने ॥"

**रसोपायहयैश्छिन्ना नसौ मरसला गुरुः ।**

**हरिणी**

षड्भिश्चतुर्भिः सप्तभिश्चात्र विरतिः । यथा —

"व्रजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नले दूरं तारापतौ च हतौजसि ।
लघु रघुपतेर्जायां मायामयीमिव रावणि-
स्तिमिरचिकुरग्राहं रात्रिं हिनस्ति गभस्तिराट् ॥"

**नजभा जो जो लगौ च कटकं विदुः ॥ ३५ ॥**

यथा —

"तरुणतमालनीलबहलोन्नमदम्बुधराः
शिशिरसमीरधूतघननूतनवारिकणाः ।

कथमवलोकयेयमधुना हरिरिहेतिमती-
मदकलनीलकण्ठकलहैर्मुखराः ककुभः ॥"

उपायैश्च नयैरश्वैर्विरामो यत्र विद्यते ।
मन्दाक्रान्ता तु सा ज्ञेया मभौ नतलगाः गुरुः ॥ ३६ ॥

चतुर्भिः षड्भिः सप्तभिरत्र विरतिः । यथा—

"तन्वी बाला मृदुतनुरिति त्यज्यतामत्र शङ्का
लोके मत्तभ्रमरपतनान्मञ्जरी किन्नु भग्ना ।
तस्मादेषा रहसि भवता निर्दयं मर्दनीया
मन्दाक्रान्ता विसृजति रसं नेक्षुयष्टिः समग्रम् ॥"

अथाष्टादशाक्षरपादायां धृत्यां वृत्तमेकमाह—

धृत्यां तु नगणद्वन्द्वं रगणानां चतुष्टयम् ।
हरिद्भिर्वसुभिश्छेदो यत्र स्यात् कौमुदीह सा ॥ ३७ ॥

अत्र दशभिरष्टभिर्विच्छेदः । यथा—

"रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे सङ्क्रमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥"

अथैकोनविंशत्यक्षरपादामतिधृतिमुद्दिशति—

अतिधृत्यां तु सूर्याश्वैर्विरामो यत्र दृश्यते ।
मसौ जसौ तः शार्दूलविक्रीडितमिदं तगौ ॥ ३८ ॥

यत्र मगणसगणजगणसगणतगणतगणगुरवस्तद् द्वादशभिः सप्तभिर्विच्छिन्नं शार्दूलविक्रीडितं नाम । यथा—

"वाणि! त्वत्पदपद्मरेणुकणिका या स्वान्तभूमिं सतां
सम्प्राप्ता कवितालता परिणता सैवेयमुज्जृम्भते ।
त्वत्कर्णेऽपि चिराय यत्किसलयं सूक्तापदेशं शिरः-
कम्पभ्रंशितपारिजातकलिकागुच्छे विधत्ते पदम् ॥"

**यमौ नसौ ररौ गश्च मेघविस्फूर्जिता भवेत् ।**
**रसैर्नयैस्तुरङ्गैश्च विरामो यत्र विद्यते ॥ ३९ ॥**

षड्भिः षड्भिः सप्तभिरत्र विरतिः । यथा—

"धनाभोगोन्मत्तानविनयमदक्रोधलोभान्धचित्ता-
ननङ्गव्यामुग्धानभिमतवधूवञ्चिताशेषवित्तान् ।
दुरीशानासेवे शिव ! शिव ! धनाशापिशाचीगृहीतः
सकृद् ध्याने सर्वं दिशति करुणाभाजि लक्ष्मीसहाये ॥"

अथ विंशत्यक्षरपादायां कृत्यामवतरति—

**कृत्यामश्वैर्नगैः षड्भिर्विश्रान्तिं लभते तु या ।**
**मरौ भनौ यभौ लो गः सेयं सुवदना मता ॥ ४० ॥**

यथा—

"उत्तुङ्गास्तुङ्गकूलं स्रुतमदसलिलाः प्रस्यन्दिसलिलं
श्यामाः श्यामोपकण्ठद्रुममतिमुखराः कल्लोलमुखरम् ।
स्रोतःखातावसीदत्तटमुरुदशनैरुत्खातिततटाः
शोणं सिन्दूरशोणा मम गजपतयः पास्यन्ति शतशः ॥"

अथैकविंशत्यक्षरपादां प्रकृतिं प्रस्तुवन्नाह—

**प्रकृत्यां मुनिशैलाश्वैर्विश्रमो यत्र विद्यते ।**
**मरौ भनौ यत्रयं च स्रग्धरा नाम सा भवेत् ॥ ४१ ॥**

अत्र स्रग्धरायां सप्तभिः सप्तभिः सप्तभिर्विरतिः। यथा—

"स्वच्छन्दैकस्तनश्रीरुभयमतमिलन्मौलिचन्द्रः फणीन्द्र-
प्राचीनावीतवाही सुखयतु भगवानर्धनारीश्वरो वः।
यस्यार्धे विश्वदाहव्यसनविसृमरज्योतिरर्धे कृपोद्यद्-
बाष्पं चान्योन्यवेगप्रशमसिमिसिमाकारि चक्षुस्तृतीयम्॥"

**रनौ रनौ रनौ रश्च प्रयुज्यन्ते क्रमेण चेत्।**
**अनिर्दिष्टान्यसंज्ञत्वाद् वृत्तभेदं प्रचक्षते॥ ४२॥**

यथा—

"कामबाणजनितामया जगति कामिनीजनमुपासते
कामिनो विविधकामितातिशयभूमितामलमुपागताः।
सोमशेखरपदारविन्दमभिरामकामफलदं शिवं
क्षेमकारमपि नो भजन्ति शिव! राम! राम! किमहं ब्रुवे॥"

---

इत्थं समवृत्तानि प्रदर्श्यार्धसमवृत्तानि प्रविदर्शयिषुराह—

**आकृत्यादावप्रयोगबाहुल्यात् तत्र न श्रमः।**

आकृतिर्नाम द्वाविंशत्यक्षरपादं छन्दः। तस्य काव्यादौ भूयशः प्रयोगाभावात् तल्लक्षणं नोच्यत इत्यर्थः। तथैव विकृतिसङ्कृत्यभिकृत्युत्कृतयोऽपीति पञ्चेमानि छन्दांस्युपेक्षितानि॥

**अथार्धसमवृत्तानि कथ्यन्ते यानि कानिचित्॥ ४३॥**

'प्रथमाङ्घ्रिसमो यत्रे'त्यादिना लक्षितपूर्वाणि अर्धसमवृत्तानि यानि कानिचित् क्रमं विना कतिपयानि कथ्यन्ते—

**अयुग्मे भभभा गो गो युग्मे नजजया यदि ।**
**द्रुतमध्येति तद्वृत्तं महार्धसममुच्यते ॥ ४४ ॥**

'महार्धसममि'त्यर्धसमेषु कश्चिद् भेदः। अयुग्मे प्रथमतृतीयपादयोर्भगणत्रयं गुरुद्वयं च, युग्मे द्वितीयचतुर्थपादयोर्नगणो जगणद्वयं यगणश्च यदि स्युस्तदा द्रुतमध्या नाम । यथा—

"मञ्जुलवञ्चुलकुञ्जकुटीरे
मधुकरकूजितपूजितपुष्पे ।
राधिकया सह गूढरतानि
स्मरघटितानि जयन्ति मुरारेः ॥"

**अयुग्मे सससा गश्च युग्मे तु भभभा गगौ ।**
**यदि वेगवती नाम वृत्तं वृत्तविदो विदुः ॥ ४५ ॥**

अयुजि सगणत्रयं गुरुश्च, युजि भगणत्रयं गुरुद्वयं च यत्र सा वेगवती नाम । यथा—

"अरुणौ चरणौ करुणाब्धेरारणितामलनूपुरभाजौ ।
यमुनापुलिने कलहंसैराद्दतसन्निधिकाववतां वः ॥"

**त्रिसकारं लघुगुरू ओजे युग्मे तु भत्रयम् ।**
**गुरुद्वयं च यत्र स्यादुपचित्रं तदुच्यते ॥ ४६ ॥**

स्पष्टम् । यथा—

"हिमशैलसुतासहितं भजे
बालशशाङ्ककलाङ्कितमौलिम् ।
कटकीकृतवासुकिपन्नगं
कामदमामयनाशनमीशम् ॥"

विषमे ननरा लो गः समे नजजरा यदि ।
तत् स्यादपरवक्त्राख्यं वृत्तरत्नाकरे स्थितम् ॥ ४७ ॥

यथा —

"सुरभिलवनमालयाञ्चितं
तरलितहारमुदारकौस्तुभम् ।
मरतकमणिशोभमाश्रये
नरकरिपोर्विपुलं भुजान्तरम् ॥"

अयुग्मपादे नयुगं रेफो यश्च प्रयुज्यते ।
युग्मे नजजरा गश्च पुष्पिताग्रा हि सा स्मृता ॥ ४८ ॥

यथा —

"क्षणमपि विरहः पुरा न सेहे
नयननिमीलनखिन्नया यया ते ।
श्वसितु कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम् ॥"

ओजे ससौ जगौ यत्र युग्मे सभरला गुरुः ।
वैतालीयमिदं वृत्तं वृत्तशास्त्रेषु निश्चितम् ॥ ४९ ॥

यथा —

"अपि लोकयुगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि ।
श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापतेः ॥"

विषमे ससजा गौ च समे सभरया यदि ।
वसन्तमालिका नाम वृत्तमेतदुदाहृतम् ॥ ५० ॥

"मलिनश्चपलाशयो जलात्मा
समयश्लाघ्यतमो बभूव वृष्टया ।

शतमप्यपहन्ति दूषणानां
परमेको हि गुणः परोपकारः ॥"

**यस्यामयुजि सद्वन्द्वात् सकारोऽथ लघुर्गुरुः ।**
**युजि च स्युर्नभभरा यदि सा हरिणप्लुता ॥ ५१ ॥**

यथा —

"द्रविणं तरुणी सुहृदः सुता
भवनसम्पदरातिपराभवः ।
निरमास्यदमूनि न चेद् विधिः
समभविष्यदयं विफलो भवः ॥"

**ओजे तु तजरा गश्च युग्मे मसजगा गुरुः ।**
**वृत्तं भद्रविराण् नाम काव्यादौ विरलं तु तत् ॥ ५२ ॥**

विरलमिति अचारुत्वात् तुच्छप्रयोगमित्यर्थः ।

यथा —

"लक्ष्मीपतये नमोऽस्तु तस्मै
दत्ते यो वरदः स्वमाश्रितेभ्यः ।
स्त्रीयां दयितां निजं च देहं
तत्तुल्यः कतमोऽस्ति दानशौण्डः ॥"

---

इत्थमर्धसमवृत्तानि लक्षयित्वा 'यस्य पादचतुर्थेऽपी'त्यादिलक्षितपूर्वं विषमवृत्तं प्रवर्तयन्नाह —

**अथो विषमवृत्तेषु द्वित्राण्यत्र प्रचक्ष्महे ।**
**आदिमे सजसा लश्च द्वितीये नसजा गुरुः ॥ ५३ ॥**
**तृतीये भनजा लो गश्चतुर्थे सजसा जगौ ।**
**यत्र सङ्घटिता एवमुद्गता नाम सा भवेत् ॥ ५४ ॥**

यथा —

"अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत् तपांसि विदधे
[धनञ्जयः ॥"

प्रथमे मसजा भो गौ द्वितीये सनजा रगौ ।
तृतीये तु ननौ सश्च चतुर्थे नत्रयं जयौ ॥ ५५ ॥
उपस्थितप्रचुपितं नाम वृत्तमिदं विदुः ।

यथा —

"कोटीरे वहते तुषारदीधितिखण्डं
फणिनां गणमपि ताञ्च जह्नुकन्याम् ।
शतमपि विधिशिरसा-
मनुदिनमचलदुहितृनाथ ! नमस्ते ॥"

नत्रयं प्रथमे यश्च नचतुष्कं सगौ ततः ॥ ५६ ॥
नषट्कं च तृतीये गौ चतुर्थे नद्वयं गुरू ।
भवेदमृतधाराख्यं वृत्तमीदृशलक्षणम् ॥ ५७ ॥

यथा —

"उदयति शशिमुखि ! शशिबिम्बं
वलति मलयमरुदुरुपरिमलवाही ।
ज्वलति मनसि मदनहुतभुगति हि गतघृणा त्वं
वहसि यदभिमानम् ॥"

———

इह सामान्येनैवमवधार्यमित्याह —

**पादान्ते गुरुसंज्ञाया विभाषात्वं यदीरितम् ।**
**व्यवस्थितविभाषात्वं तस्य स्यादिष्टसिद्धये ॥ ५८ ॥**

'वा पादान्त' इति पादान्तगतस्य वर्णस्य पाक्षिकत्वेन गुरुत्वं यदनुशिष्टं तद् व्यवस्थितं भवितुमर्हति । किं कारणम् । **इष्टसिद्ध्यर्थम्** ।

एवंकृते किं कृतं भवतीति चेदुच्यते —

**भवेदुपेन्द्रवज्रादेरोजान्तेषु विकल्पतः ।**
**नियमेनेतरेषां तु गुरुत्वमविकल्पितम् ॥ ५९ ॥**

उपेन्द्रवज्रादेरिति । अत्र परिगणनम्—उपेन्द्रवज्रा, इन्द्रवज्रा, उपजातयः, वसन्ततिलकम् , इत्येतेषामेव तावत् प्रथमतृतीयपादान्तवर्णेषु गुरुत्वस्य विकल्पेन लघुत्वं न त्वन्येषामिति भाष्यादौ स्थितम् । द्वितीयचतुर्थपादान्तवर्णेषु विकल्पस्तु सर्वेषामपि वृत्तानां सर्वसम्मत एव । प्रथमतृतीयपादान्तवर्णेष्वेवायं नियम इति बोध्यम् । अत्र तावदुपेन्द्रवज्रोदाहरणे "मदन्यदानं प्रति शङ्कितेयम्" इत्यादौ । इन्द्रवज्रोदाहरणे "श्रीरामपादाम्बुजरेणुपूरसंपर्कसम्पादितशापमोक्षामि"त्यादौ । एवमुपजात्युदाहरणे "अनन्तरत्नप्रभवस्य यस्य हिमामि"त्यादौ । तथा वसन्ततिलकोदाहरणे —

"लोकेशकेशवशिवानपि यश्चकार
शृङ्गारसान्तरभृशान्तरशान्तभावान् ।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन
संक्षोभयन् वितनुतां वितनुर्मुदं वः ॥"

इत्यादौ च प्रथमतृतीयपादान्ते लघुत्वमुपपद्यत एव । परिगणितवृत्तव्यतिरिक्तानां तु सर्वेषामोजपादान्ते गुरुत्वस्य विकल्पो न कर्तव्य इत्यर्थः । कथं तर्हि —

"केकया च शिखिनां मृदुधूतकेतकीसुमनसा मरुता च।"

इति स्वागतायामोजपादान्ते लघुत्वं दृश्यते । इदमसाध्वेवेति गृहाण ।

---

अथ मात्रावृत्तान्याह —

**मात्रावृत्तानि कथ्यन्ते गणानां नियमं विना ।**
**लक्षितोऽपि स भूयिष्ठं प्रयोगेषु न दृश्यते॥ ६० ॥**

गणानां नियमे हि वृत्तशास्त्रकारैः "लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे ज" इत्याद्यार्यादीनां लक्षणमुक्तम् । तद्धि प्रयोगेषु भूयशो न दृश्यत इति गणनियमं विनैव मात्रामात्रप्रदर्शनेन कानिचिद् वृत्तानि कथ्यन्त इत्यर्थः ॥

**ओजे द्वादशमात्रत्वं मात्रावृत्तेषु सर्वशः ।**
**तेन युग्मे तु यो भेदः स एवात्र प्रदर्श्यते ॥ ६१ ॥**

प्रथमतृतीयपादयोर्द्वादशमात्रत्वं तावदार्यादिषु न व्यभिचरतीति नैतत् प्रदर्शनीयम् । द्वितीयचतुर्थपादयोस्तु भिन्नलक्षणत्वात् तत्रैवायमारम्भ इति प्रथमतृतीयपादयोर्द्वादशमात्रत्वं विधिरूपेणानुवादेन प्रदर्शयन्नार्यादीनां युग्मेषु विशेषलक्षणं प्रणिबध्नाति ॥

**अष्टादशकला यस्या द्वितीये चरणे स्थिताः ।**
**तुरीये पञ्चदश चेदार्या नाम भवेदसौ ॥ ६२ ॥**

कला मात्राः । तास्तु यस्याः द्वितीयपादेऽष्टादश, चतुर्थपादे पञ्चदश चेद् भवन्ति, सेयमार्या नाम । यथा —

"स्तनयुगमश्रुस्नातं समीपतरवर्तिहृदयशोकाग्नेः।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥"

**अष्टादशैव मात्राश्चेद् युग्मयोर्गीतिरेव सा ।**

यथा —

"मधुरं वीणारणितं पञ्चमसुभगश्च कोकिलारावः ।
गीतिश्च सुन्दरीणामधुना कुसुमायुधं प्रबोधयति ॥"

**तयोः पञ्चदशैताश्चेदुपगीतिरिति स्मृता ॥ ६३ ॥**

तयोः युग्मपादयोरेता मात्राः । यथा —

"उवह मुहाइ वहूणं महुमअतंबाइ रम्माइ ।
अगळिअसंझाराअं मिअंकबिम्बं हसान्तिव्व ॥"

**आर्यां व्यत्यस्तविन्यस्तामुद्गीतिं मुनयो विदुः ।**

व्यत्यस्तविन्यस्तां विपरीतन्यस्ताम् । द्वितीये पञ्चदश तुरीयेऽष्टादशेति हि व्यत्यासः । यथा —

"उज्ज्वलकनककिरीटं मकराकृतिकुण्डलोपेतम् ।
कौस्तुभवनमालाञ्चितभुजान्तरालं भजामि गोविन्दम् ॥"

**आर्यागीतिस्तदा मात्रा युग्मयोर्विंशतिर्यदा ॥ ६४ ॥**

यथा —

"णमह अवंढिअतुंगं अविसारिअवित्थअं अणोणअगहिरं ।
अप्पलहुअपरिसंह्णं अणाअपरमत्थपाअडं महुमहणम् ॥"

अथवा —

"प्रदिशतु गिरिशास्तिमितां
ज्ञानदृशं वः श्रियं च गिरिशास्तिमिताम् ।
प्रशमितपरमदमायं
सन्तः सञ्चिन्तयन्ति परमदमायम् ॥"

अथोपसंहरन्नाह —

**वृत्तशास्त्रप्रपञ्चानां दिङ्मात्रमिह दर्शितम् ।**
**येन तीर्थेन बालोऽपि शास्त्राब्धिमवगाहते ॥ ६५ ॥**

पिङ्गलजनाश्रयादिभिराचार्यैः सविस्तरमुपनिबद्धत्वात् बहुलीभूतानां छन्दश्शास्त्राणां दिङ्मात्रं मार्गमात्रमत्र दर्शितम् । तत् किमर्थमित्याह — येनैव तीर्थेनावतारेण बालोऽप्यल्पप्रज्ञोऽपि शास्त्रमेवाब्धिमवगाहतेऽवतरति । प्रमुग्धोऽपि दिङ्मात्रप्रदर्शनद्वारा स्वाभीष्टं देशं प्राप्नोतीति सकलं मङ्गलम् ।

विभाव्य वृत्तशास्त्राणि तेभ्यः संक्षिप्य चोद्धृतम् ।
रामेण पाणिवादेन तदेतद् वृत्तवार्त्तिकम् ॥

इति वृत्तवार्त्तिके मात्रावृत्तप्रकरणं समाप्तम् ॥

# वृत्तवार्त्तिके

## (रासक्रीडा।)

---

*भास्वद्वंशादाविर्भूतं भास्वद्रूपं मुक्तारत्नम्।
सीतावक्षोजालङ्कारः श्रीरामो वः श्रेयो देयात्॥ १॥

अहं विष्णो रासक्रीडामहं मोहादाचक्षाणः।
परीहासस्यैकं पात्रं भविष्यामि प्रज्ञाभाजाम्॥ २॥

गोपवेषं संगृह्णानो गोपवाटीमध्यासीनः।
गोपनारीजारः स्वैरं गोपबालैः साकं रेमे॥ ३॥

यमुनातीरे सानन्दं रममाणोऽसौ गोविन्दः।
तरुणीसङ्घानाक्रष्टुं मुरलीनादं सन्तेने॥ ४॥

आकर्ण्य वेणोरुद्गीर्णं लोकाभिरामं सङ्गीतम्।
आघूर्णमानास्तिर्यञ्चोऽप्यापूर्णमोदाः सञ्जाताः॥ ५॥

मिथो विरोधान् मुञ्चन्तो मृगाधिराजा मातङ्गैः।
कुरङ्गपोताः शार्दूलैः समं निषण्णाः सानन्दम्॥ ६॥

तत्र तरूणां शाखाग्रे चित्रमहो ते भल्लूकाः।
कृत्रिमभावं सम्प्राप्ताश्चङ्क्रमशीला ये पूर्वम्॥ ७॥

स्वकुलतोऽत्यन्तप्रीत्या नकुलयोषाणां मध्ये।
सुखमुपासीना नागा निशमयन्ति स्मोद्गीतम्॥ ८॥

कालिन्दीतटे गोविन्दे केलीलम्पटे सम्भूते।
तिर्यञ्चोऽप्यभूवन् प्रीताः किं ब्रूमो मुदोऽत्राम्येषाम्॥ ९॥

---

* आनुष्टुभानि प्रस्तारक्रमागतान्युदाहरणानि कथ्यन्ते।

G. P. T. 844. 500. 8-5-1112.

तदानीं व्रजवासिन्यस्तदाकर्णयन्त्यो गीतम् ।
समस्तं त्यजन्त्यो गोप्यः समन्ताद् वनान्तं भेजुः ॥ १० ॥
कामसायकैराविद्धा रामसोदरे सम्बद्धाः ।
चित्तवृत्तयो गोपीनां कुत्र वान्यतो रज्यन्ते ॥ ११ ॥
स्वपितु स्वयं मे भर्ता स्वपितुश्च किं वक्तव्यम् ।
इति काचन प्राव्राजीदतिकामुकी गोविन्दे ॥ १२ ॥
किं मे तनयेनासाध्यं किं मे भवनेनावाप्यम् ।
सिध्येदखिलं कृष्णेऽस्मिन्नित्थं ब्रुवती यातैका ॥ १३ ॥
मनो रमते यत्रासौ जनो रमणो नारीणाम् ।
अतो भवानस्माकं मतो दृढमित्येकागात् ॥ १४ ॥
किं मम धनैर्नश्यद्भिः किं मम जनैर्द्रुह्यद्भिः ।
अच्युतपदावाप्तिर्मे निश्चलसुखेत्यन्यागात् ॥ १५ ॥
मुरमथनो जीवो मे परममुना विश्लिष्टा ।
तनुरधुना निर्जीवा पुनरिति काप्यानंहे ॥ १६ ॥
इत्थं सर्वा नितम्बिन्यो मुक्तशङ्का मुकुन्दं तम् ।
वृन्दारण्ये समासीनं वृन्दीभूताः समासेदुः ॥ १७ ॥
नदीशैलान् नदारण्यान्यतीत्यारान्निशारम्भे ।
समायन्तीरिमा दृष्ट्वा रमानाथो जगादेदम् ॥ १८ ॥
स्वागतं वो विलासिन्यो! वेगतो मामुपेतानाम् ।
कारणं किं वने घोरे स्वैरयाने निशाकाले ॥ १९ ॥
त्रसदेणीदृशो यूयं क्व च गोपालसुन्दर्यः ।
क्व च सिंहादिसत्त्वानां पदमेतच्च कान्तारम् ॥ २० ॥

कुण्ठेतरैरमी भीमाः कण्ठारवैरुपायान्तः।
कण्ठीरवाः करीन्द्राणां कुम्भस्तलीर्विभिन्दन्तः ॥ २१ ॥
नखाग्रलग्नमुक्तौघाः मुखावरुग्णसारङ्गाः।
इतश्चरन्ति कान्तारे कथं न भीतिरुत्पन्ना ॥ २२ ॥
रात्रिरहो महाघोरा कोऽत्र चरेद् वधूलोके।
कुत्र गतो विवेको वश्चित्रमिदं स्वतन्त्रत्वम् ॥ २३ ॥
व्रजत भो नितम्बिन्यो ! व्रजपदं निजं भूयः।
अनुचितः कुलस्त्रीणामपरपुरुषे रागः ॥ २४ ॥
भर्तॄणामथ शुश्रूषा कर्तव्या खलु युष्माभिः।
भर्तारः कुलनारीणां कर्तारोऽखिलसिद्धीनाम् ॥ २५ ॥
कुलस्त्री कुलसञ्जाता खलस्त्रीजनचापल्यम्।
विधत्ते बत या नारी पतत्येनसि सा घोरे ॥ २६ ॥
दैवत खलु नारीणां केवलं पतिरेतासाम्।
तत्र या विमुखी सेयं कुत्र वा कुशलं विन्देत् ॥ २७ ॥
जरठो जटिलो रोगी विकृतो विरसो वासौ।
करुणारहितो वास्तु स्वपतिर्न परित्याज्यः ॥ २८ ॥
मा मा कुरुत वैमुख्यं कामातुरितचित्तेभ्यः।
कुत्रापि निजकान्तेभ्यस्तत्राप्यधिकतान्तेभ्यः ॥ २९ ॥
अहोनुखलु कामोऽयं महादुरितहेतुर्वः।
परेण रतिमिच्छन्त्यः पतींस्त्यजथ हा कष्टम् ॥ ३० ॥
गोकुलवनिताः कस्मादाकुलमनसो यूयम्।
मामकवचने धर्म्ये सम्प्रति नहि तिष्ठध्वे ॥ ३१ ॥

विरहविधुरस्वान्तान् मदनदहनक्लान्तान् ।
त्वरितमधुना कान्तानभिसरत भो दान्तान् ॥ ३२ ॥

आशापाशच्छेददात्रं क्लेशाधानस्यैकपात्रम् ।
आकर्ण्येदं कृष्णवाक्यं शोकाविष्टा ऊचुरेताः ॥ ३३ ॥

हरे! मा मा वोच एवं स्मरेणालं बाध्यमानाः ।
त्वदायत्ता गोपनारीर्मुदा त्वं नः पाहि शौरे! ॥ ३४ ॥

वल्लभस्त्वं वीतपुण्यैर्दुर्लभस्त्वं मल्लवैरिन्! ।
विश्वगस्त्वं विश्रुतस्त्वं विश्रमस्त्वं विज्वरस्त्वम् ॥ ३५ ॥

पतिरेकस्त्वं परात्मन्! गतिरेकस्त्वं जनानाम् ।
जनको मित्रं तनूजो जननी च त्वं मुरारे! ॥ ३६ ॥

जीवो भवान् जीवबन्धो! देवो भवान् देहभाजाम् ।
भावो भवान् भाग्यराशे! को वा भवान् नाधुना नः
[ ॥ ३७ ॥

वयं तु गोप्यो भवन्तं विना न कञ्चिद् भजामः ।
सरोरुहिण्यो दिनेशादृते कमन्यं श्रयन्ते ॥ ३८ ॥

तावकदासीरिमा नः पावकतुल्यैः स्मरास्त्रैः ।
तापितचित्ता निकामं प्रापय शौरे! समीपम् ॥ ३९ ॥

सरसिजपाटलं द्रागुरसि नो देहि पाणिम् ।
स्मरशरातङ्कशान्त्यै परमिदं भेषजं नः ॥ ४० ॥

पश्येमान् पयोधरस्थान् पाटीरद्रवानुलेपान् ।
संसक्तान् निजोरसि त्वं सन्देहं विना विवेकाः ॥ ४१ ॥

रमाया घनस्तनाभ्यां समामर्दितं विभो! ते ।
स्तनौ नः कदा नु शौरे! स्पृशेतां भुजान्तरालम् ॥ ४२ ॥

वन्यमालया विषक्ते धन्यतामवे विविक्ते ।
वत्सलाञ्छने तवोरस्युत्सुकाविमौ स्तनौ नः ॥ ४३ ॥
परितापशोषिता नः परिरम्भणेन गाढम् ।
परिगृह्य याशु ना त्वं परिपाहि शार्ङ्गपाणे ! ॥ ४४ ॥
चेतोरुचितं वधूनां दातुं हि भवानिदानीम् ।
एतादृगिदं स्वरूपं नेता जगतो विधत्ते ॥ ४५ ॥
मयूरकलापमालामनोज्ञकचावलीकम् ।
अरालघनालकश्रीविराजि विशालफालम् ॥ ४६ ॥
कुङ्कुमकृतोर्ध्वपुण्ड्रं पङ्कजदलायताक्षम् ।
अण्डजसमानवेल्लत्कुण्डलविलासिगण्डम् ॥ ४७ ॥
तिलकुसुमाभघोणं विलसदपाङ्गशोणम् ।
स्फुरदरुणाधरोष्ठं प्रविशददन्तशोभम् ॥ ४८ ॥
राकाचन्द्रप्रतिमास्यं लोकानन्दस्मितलास्यम् ।
कम्बुच्छायाहरकण्ठं कम्रश्रीपूरमकुण्ठम् ॥ ४९ ॥
उरः श्रीकौस्तुभरत्नस्फुरच्छ्रीवत्सकचिह्नम् ।
समालोलद्वनमालं समाबिभ्रद् घननीलम् ॥ ५० ॥
वेणुशङ्खावनुवेलं पाणियुग्मे वहमानम् ।
शोणशोचिर्नखजालं शोभमानामलचेलम् ॥ ५१ ॥
मणिमत्काञ्चनकाञ्चीघृणिजालातिमनो(ज्ञः ? ज्ञम्) ।
जघनं पीतदुकूलं सुघनं बिभ्रदुदारम् ॥ ५२ ॥
चारूरुकाण्डसुजङ्घं चातुर्यसीम विधातुः ।
आताम्रपादसरोजं चेतोभिराममशेषम् ॥ ५३ ॥

रमापते! तव रूपं रसायनं नयनानाम् ।
मनोहरं महनीयं घनोपमं कमनीयम् ॥ ५४ ॥
लोचनगोचरतां नो यातमहो बत भाग्यम् ।
मा वद मा वद वामं मानद! पूरय कामम् ॥ ५५ ॥
सफलता नयनानां सपदि नः समुपेता ।
सरसकोमलमेतद्वपुरदर्शि यतस्ते ॥ ५६ ॥
मुग्धैस्ते मुरलीनादैः स्निग्धं नः श्रवणसौख्यम् ।
तच्छेषाननुभवान्नो दाता किं ननु भवान्नो ॥ ५७ ॥
कथं त्वामनभियान्त्यः सजीवा भुवि वसामः ।
म्रियन्ते क नु चकोर्यः सुधांशुं परिजहत्यः ॥ ५८ ॥
वासुदेव! तव दासीस्त्वद्वियोगमसहन्तीः ।
त्वत्समीपमुपयान्तीर्मा त्यज त्वमधुना नः ॥ ५९ ॥
करुणाकर! हरे! ते चरणाम्बुजयुगं नः ।
शरणं शिरसि दिव्याभरणं विरचयेदम् ॥ ६० ॥
रामानुज! तव चेतो रामाजनसुखहेतो! ।
कामातुरमनसां नः कामाननुसरतु द्राक् ॥ ६१ ॥
भवानखिलजनानां भवार्णवपतितानाम् ।
भवत्यविकलमात्मा भवाद्यमरशरण्यः ॥ ६२ ॥
तादृशि भवति तुष्टे तुष्यति सकललोकः ।
तेन हि गृहपतिभ्यो नो वयमिह बिभीमः ॥ ६३ ॥
अशरणजनबन्धो! भृशतरगुणसिन्धो! ।
जनमिममतिमायाघनतम! परिपायाः ॥ ६४ ॥

इत्यनुष्टुप्प्रस्तारे प्रथमः परिच्छेदः ॥

## अथ द्वितीयः परिच्छेदः ।

गोपस्त्रीणामेवंविधा वाचः श्रुत्वा दामोदरः ।
कारुण्यार्द्रः स्मेराननश्चारूदारा वाचोऽगदीत् ॥ १ ॥

मनो रासक्रीडोत्सुकं ममेदानीमुद्दीपितम् ।
वरोरूणां वाक्यामृतैर्विरोधोक्तिर्मे क्षम्यताम् ॥ २ ॥

कामलीलाकुलक्ष्मुषः कामिनीनां वो विभ्रमः ।
यामुनोऽयं देशोऽद्भुतो यामिनीयं त्वायामिनी ॥ ३ ॥

ललनाकेलिकौतुकी वलमानोऽहं कानने ।
मिलितो गोपीमण्डलैर्ललितो मे भाग्योदयः ॥ ४ ॥

चन्द्रातपोऽयं शोभते सान्द्रामृताभिष्यन्दनः ।
कन्दर्पलीलावल्लरीकन्दः किलायं कामिनाम् ॥ ५ ॥

चकोरजातेर्जीवनं चकास्ति कामोद्दीपनम् ।
तुषारभानोर्मण्डलं पुरोहरित्स्त्रीकुण्डलम् ॥ ६ ॥

उन्नतयोर्वक्षोजयोश्चन्दनलेपो योषिताम् ।
मन्दहसश्रीराननेचन्द्रकराणामुद्गमः ॥ ७ ॥

चटुलभृङ्गीतारकैः स्फुटमसावुन्मीलितैः ।
कुमुदनेत्रैरीक्षते कुमुदिनीन्दोरागमम् ॥ ८ ॥

सर्वेषां मनोमोहनः शर्वाणीपतेर्भूषणम् ।
उद्गच्छत्यसौ चन्द्रमा उद्गीर्णस्फुरच्चन्द्रिकः ॥ ९ ॥

मुखानां सखा वः शशी सुखानां विधाता स्वयम् ।
प्रकाशं समुद्भासते प्रकामं दृशो रञ्जनम् ॥ १० ॥

पुष्पचापसेनापतिः पुष्पगन्धधूपादिभिः ।
पूजनीय एषोऽधुना पूर्णचन्द्रबिम्बाननाः! ॥ ११ ॥

यमुनातटे शोभने यमिनां मनोलोभने ।
रमयामहे वो वयं रमया समा योषितः! ॥ १२ ॥
आगच्छत मे सन्निधौ वेगादधुना गोपिकाः! ।
रागाम्बुनिधौ लीयतां राजीवदृशां मानसम् ॥ १३ ॥
स्मरोऽपि निजं कार्मुकं करोतु करे सज्जितम् ।
प्रसूनशरांश्चानघान् प्रयोक्तुमना जृम्भताम् ॥ १४ ॥
चञ्चलदृशां वो मनोवञ्चनमसौ मन्मथः ।
वाञ्छति स चेदाशुगैः पञ्चभिरलं किं भवेत् ॥ १५ ॥
शरदिजपुष्पावलीः शरयतु पुष्पायुधः ।
विकिरतु वीराग्रणीर्विहृतिषु सोऽस्मासु ताः ॥ १६ ॥
रासक्रीडाविनोदने रामाणां वो मनोरथाः ।
सम्पूर्यन्ते मयामुना सम्यङ् मारेण चाधुना ॥ १७ ॥
इति श्रुत्वा हरेर्वाचो रतिक्रीडादृतात्मनः ।
अतिप्रीता व्रजाङ्गनाः स्मितं कृत्वा तमब्रुवन् ॥ १८ ॥
नाथ! शौरे! नमोऽस्तु ते दीनबन्धो! नमोऽस्तु ते ।
नन्दसूनो! नमोऽस्तु ते रम्यमूर्ते! नमोऽस्तु ते ॥ १९ ॥
उचितं ते वचोऽमृतं रुचिरं नो रमापते! ।
सुचिरं वाञ्छितं सुखं सुतरामद्य साधयेः ॥ २० ॥
वृन्दावने विलासिनीवृन्दावने समुद्यतः ।
वृन्दारकाभिवन्द्य! गोविन्दाधिकं विराजसे ॥ २१ ॥
स्मरातिसुन्दरो भवानुदूढमन्दरो भवान् ।
उरोधृतेन्दिरो भवान् गुणैकमन्दिरो भवान् ॥ २२ ॥

सज्जनवल्लभो भवान् दुर्जनदुर्लभो भवान् ।
कालियमर्दनो भवान् केलिविवर्धनो भवान् ॥ २३ ॥
कमललोचनो भवान् शमलमोचनो भवान् ।
पतगवाहनो भवान् परममोहनो भवान् ॥ २४ ॥
इत्येवं नुतिशालिनीरत्यन्तप्रणयाकुलाः ।
आदाय व्रजयोषितो गोविन्दो यमुनातटे ॥ २५ ॥
लतामण्डपमावसन्नितान्तादरमावहन् ।
विहासोल्लसिताननो विहारानयमातनोत् ॥ २६ ॥
तुङ्गपीनपयोधरालिङ्गनेन रमापतिः ।
अङ्गनाजनमुच्चकैरङ्गजातुरमादधे ॥ २७ ॥
अथ कामपि कामिनीमतिकातरलोचनाम् ।
श्रवणे कथनच्छलात् स चुचुम्ब मुखाम्बुजे ॥ २८ ॥
लीलावलितकन्धरां व्रीळातिशयबन्धुराम् ।
आत्माङ्कमधिरोपितामालिङ्गदथ राधिकाम् ॥ २९ ॥
प्रवालशयने कयाप्यरालकचभारया ।
अशेत सह माधवो विशेषरतिलोलया ॥ ३० ॥
कामपि कलभाषिणीं कामितरतितोषिणीम् ।
कैतवकलहायितां भीतवदनमच्युतः ॥ ३१ ॥
विरुतदलिजालया तरुकुसुममालया ।
सचकितदृशः स्त्रियाः कचमथ बबन्ध सः ॥ ३२ ॥
अन्यासङ्गाशङ्कितया धन्यामन्यामात्तरुषम् ।
तत्पदान्ते स प्रणतस्त्वत्परोऽहं प्राथितवान् ॥ ३३ ॥

कुचाभ्यां ते हन्त शपे सुचार्वङ्गि! त्वद्वनिताम् ।
अहं बाले! नाहतवानिति प्रोचे काममपि सः ॥ ३४ ॥

त्वद्वनितामिति अन्यवनितामित्यर्थः । त्वदन्यपर्यायः ।

भिन्नभिन्नाकारतया सन्नताङ्गीनां निकरम् ।
सर्वमेकोऽप्यारमयन्निर्विशेषं नन्दसुतः ॥ ३५ ॥

ललनासङ्ख्यानुगुणं कलयन् स्वाश्चापि तनूः ।
रमयामासाशु हरी रमणीयास्ता रमणीः ॥ ३६ ॥

इत्येष रत्येकमनाः प्रत्येकमत्यादरवान् ।
रामासु रेमे भगवान् कामा हि सीमारहिताः ॥ ३७ ॥

मया सहायं रमते महानुभावो भगवान् ।
तृणाय मन्ये तरुणीर्गुणैर्विहीना इतराः ॥ ३८ ॥

मामकसौभाग्यमिदं कामुकचूडामणिना ।
मद्गुणबद्धेन दृढं यद् गणितान्या न वधूः ॥ ३९ ॥

मम मुखादस्य दृशौ मधुरिपोर्नो चलतः ।
मम विलासेन हृतं हृदयमप्यस्य विभोः ॥ ४० ॥

सर्वासामहो सुदृशां गर्वोऽभून्मनस्यधिकम् ।
सर्वेशे वशंगमिते सम्मोहो न कस्य भवेत् ॥ ४१ ॥

समस्तान्तरात्मतया समस्थो रमारमणः ।
विदित्वा विकारममुं विभुर्द्राक् तिरोहितवान् ॥ ४२ ॥

राधिका मदेन तदा बाधिता न सातितराम् ।
तेन हेतुना भगवानेनया सहान्तरधात् ॥ ४३ ॥

मुरशासनेऽथ गते मुहुर्मुहुः सुदृशः ।
लुलुठुर्महीपतिता रुरुदुः शुचा बहुधा ॥ ४४ ॥

हा हा क गतोऽसि हरे! हा हा छलिता भवता ।
स्नेहादिह सम्मिलिता मोहाकुलिता वनिताः ॥ ४५ ॥

अहो तव शाठ्यमिदं महाजनहास्यकरम् ।
महावनमध्य इमा विहाय गतस्य हरे! ॥ ४६ ॥

पञ्चशरबाणहता वञ्चयसि हा वनिताः ।
किं चरितमीदृगहो मुञ्चसि यदात्मवधूः ॥ ४७ ॥

तव विरहेण वयं दवशिखिनेव हरे! ।
शिव शिव दग्धतमा विवलनमातनुमः ॥ ४८ ॥

क्रीडाशाली ननु भवान् पीडामात्रा ननु भवान् ।
गोपीनां नो विहितवानन्तःशल्यं निहितवान् ॥ ४९ ॥

दयासिन्धो! तव दया क याता सा मधुरिपो! ।
यया ग्राहग्रसनजाद् भयात् त्रातो गजपतिः ॥ ५० ॥

ज्ञातमेतत् तव विभो! कातराक्षीषु न कृपा ।
पूतनामापि स भवान् पूतनामाशु हतवान् ॥ ५१ ॥

तरुणीभिर्विहरणे विरसस्त्वं यदि हरे! ।
तव राधां प्रति रतिर्भवतीदं किमुचितम् ॥ ५२ ॥

रन्तुं तया सह रहो हन्त त्वया खलु गतम् ।
मन्तुं विनापि सुमते! किन्तूज्झिता बत वयम् ॥ ५३ ॥

प्रसीद हे मुररिपो! प्रकाशय द्रुततरम् ।
निजं वपुर्निरुपमं भजन्ति यत् सुकृतिनः ॥ ५४ ॥

राधिकया सुभगया रागवशादवशया ।
पीतरसाधरपुटं स्मेरमुखामृतकरम् ॥ ५५ ॥

जलधिजाकुचपदाङ्कितभुजान्तरतटम् ।
जलजकोमलदलायतविलोचनयुगम् ॥ ५६ ॥

शिञ्जानप्रचलमणीमञ्जीराञ्चितचरणम् ।
मन्दारप्रसवरजःसन्दोहैः सुरभिकचम् ॥ ५७ ॥

मनोज्ञं वपुरयि! ते मनो नः स्मरति सदा ।
कदा तन्नयनपथे सद्मानन्दन! भविता ॥ ५८ ॥

मोहवारिधिपतिता हा हता वयमखिलाः ।
गेहतो विपिनमिदं गाहिता बत भवता ॥ ५९ ॥

छलिताः किमिति हरे! फलितास्तव कुहनाः ।
ज्वलिताः स्मरशिखिनः कलिताः प्रथममहो ॥ ६० ॥

नानारतिवितरणादेनान् परिशमयितुम् ।
प्रारभ्यत च भवता प्रालीयत च तरसा ॥ ६१ ॥

अहो कठिनहृदयो भवानजनि रजनीः ।
मुधा किमिह कुरुते सुधाकरधवलिताः ॥ ६२ ॥

त्यक्तजनकजननीभर्तृतनयभवनाः ।
भक्तसरसहृदयास्त्यक्तुमुचितमिह नः ॥ ६३ ॥

युवतिजनशरणे भवति गतकरुणे ।
किमिह बहुरुदितैरनवरतमुदितैः ॥ ६४ ॥

इत्यनुष्टुप्प्रस्तारे द्वितीयः परिच्छेदः ॥

## अथ तृतीयः परिच्छेदः ।

एवं तासु क्रोशन्तीषु देवोऽमुञ्चद् राधां चापि ।
शोकाविग्ना सापि प्राप शोभाहीना दीनोवाच ॥ १ ॥
अहं चापि त्यक्ता तेन सहारण्यं सम्प्राप्तापि ।
अहो कष्टं गोविन्देन वि(हाता ? हीना)याः किं देहेन ॥
क प्रयातः श्रीकान्तोऽद्य तत्प्रियाः! किं नो जानीथ ।
अप्रियं किं तस्याकारि यत्प्रकोपाद् यातः क्वापि ॥ ३ ॥
(मृग ? मार्ग)यामो वेगादत्र मृगपक्षिव्याकीर्णेषु ।
विपिनेषु प्राप्य प्राप्य विचरन्त्यो यत्नेनापि ॥ ४ ॥
सम्मार्गयन्त्यः कान्तारभूमौ मुकुन्दं सर्वत्र ।
पप्रच्छुरेता वृक्षांश्च वल्लीर्मृगौघानन्यांश्च ॥ ५ ॥
अशोकवृक्ष! त्वं ब्रूहि सशोकभारा नोऽद्यैत्र ।
किमम्बुजाक्षो दृष्टोऽत्र समीक्षितश्चेदाख्याहि ॥ ६ ॥
कङ्कणकाञ्चीकेयूरकुण्डलहारानङ्गेषु ।
संकलयन् कोऽप्यारक्तपङ्कजनेत्रो दृष्टो नु ॥ ७ ॥
नवघनश्यामः कोऽपि तव समीपं प्राप्तो नु ।
नवतमाल! त्वं ब्रूहि तव सवर्णो यो भाति ॥ ८ ॥
मायागोपवेषः कोऽपि जायावृन्दमुज्झित्वैव ।
यातः क्वापि चूत! ब्रूहि नाथस्त्वामुपेतः किं नु ॥ ९ ॥
विचिन्वन्ति विक्रोशन्ति वितन्वन्ति वैक्लव्यानि ।
विभोरस्य विश्लेषेण विषण्णानि गोवृन्दानि ॥ १० ॥

सञ्चरन्ति कान्तारेषु सम्पतन्ति भूपृष्ठेषु ।
सम्भ्रमन्ति सर्वाशासु गोपयौवतानीमानि ॥ ११ ॥
कृतमाल! किं कुर्याम कृतकर्मदोषेणैव ।
इह जन्मनीमे तापनिकरा हि सम्बध्नन्ति ॥ १२ ॥
गोपीजन एवं नाम पापी जन एवाकारि ।
देवेन विधात्रा हन्त हे वेतस! किं जानासि ॥ १३ ॥
तवान्तिककुञ्जे येन दिवानिशमानन्देन ।
सह्राद्भुतलीलातानि स हा क्व गतो वेगेन ॥ १४ ॥
केसरतरो! त्वं किं नु केशवगतिं जानासि ।
केवलमसौ हा हन्त देवनमुपेक्ष्यांहिष्ट ॥ १५ ॥
पशुकुलपालो यत्र शिशुपशुपाकारेण ।
समचरदत्र क्वापि स तु न तु दृष्टोऽद्यापि ॥ १६ ॥
कं देशं प्राप्य पश्येम तं देवं नावगच्छेम ।
सन्देशं प्रापयेमाथ सन्देहं मुञ्चता केन ॥ १७ ॥
चकोरि! त्वं समासाद्य सकाशं वासुदेवस्य ।
उदन्तं नोऽखिलं ब्रूहि मुदं ते सोऽपि कुर्वीत ॥ १८ ॥
श्रीपते! त्वद्वियोगेन गोपिकास्तापिता हन्त ।
कानने कानने यान्ति दीनतां क्षीणतां चापि ॥ १९ ॥
विलपन्त्यो विषीदन्ति विचरन्त्यो विचिन्वन्ति ।
विरुद(न्त्यो ? त्यो) विमुह्यन्ति विलुठन्त्यो विमूर्च्छन्ति ॥
लीलास्तवानुगायन्ति बालास्तवानुशोचन्ति ।
व्रीलां विनानुधावन्ति विश्वेश! किं न जानासि ॥ २१ ॥

अहर्निशं न निद्रान्ति महान्तमाधिमृच्छन्ति ।
न भोज्यपेयमिच्छन्ति नदीवनानि गच्छन्ति ॥ २२ ॥
त्वच्चरितानि पृच्छन्ति पक्षिमृगादिसत्त्वानि ।
अक्षिजलानि मुञ्चन्ति वृक्षतलानि सिञ्चन्ति । २३ ॥
शिशिरवातरम्याणि शशिमयूखसान्द्राणि ।
जलकणानुविद्धानि नलिनगन्धमुग्धानि ॥ २४ ॥
वापीकूपतटाकादितीराण्यन्यमनोज्ञानि ।
गोप्यो हन्त विनिन्दन्ति गोविन्द ! त्वदयोगेन ॥ २५ ॥
शशाङ्कांशुविशुद्धासु निशास्वेव समस्तासु ।
विषीदन्ति भृशं नाम निषीदन्ति न कुत्रापि ॥ २६ ॥
वल्लवीजनदुःखानि वक्तुमेव न शक्यानि ।
एहि माधव ! वेगेन पाहि तं जनमद्यैव ॥ २७ ॥
ललनाजनसन्तापकलनाय निलीनोऽसि ।
फलमङ्ग ! किमेतेन बलसूदनसोदर्य ! ॥ २८ ॥
कामातुरशरीरासु मा मा विमुखताकारि ।
नाथेन भवता कृष्ण ! नारीषु तव दासीषु ॥ २९ ॥
प्रकामरमणीयाङ्ग ! सकाशमुपसङ्क्रम्य ।
प्रकाशय वपुर्देव ! सुखाकुरु सखीराशु ॥ ३० ॥
सुन्दररमणीयानि नन्दज ! भवदङ्गानि ।
विन्दतु सुदृगोघः स नन्दतु न चिरादेव ॥ ३१ ॥
विरहिणि जने कृष्ण ! विरचय दयामाशु ।
परिसरमुपायाहि परिणतसुखं देहि ॥ ३२ ॥

एवं ब्रूया हे चकोरि! देवं गोविन्दं समेत्य ।
वेगादागन्ता ततः स वेदान्तावेद्यो जनो हि ॥ ३३ ॥
शुकि! त्वं वा तत्र गच्छ सुतः शौरेरस्ति यत्र ।
मनुष्योक्त्या वक्तुमद्य ननु त्वं प्रागल्भ्यमेषि ॥ ३४ ॥
वल्लभानां वञ्चनं हि कल्यबुद्धे! कष्टमेव ।
अप्रियं ते ताभिरङ्ग! कल्पितं किं कञ्जनाभ! ॥ ३५ ॥
भवदर्थे भर्तृपुत्रभवनानि प्रोज्झितानि ।
कति शैलाः काननानि सरितो वा लङ्घितानि ॥ ३६ ॥
वल्गूच्चलत्कुण्डलानि वामालकामण्डलानि ।
एवं त्वया सङ्गतानि देवेश! किं विस्मृतानि ॥ ३७ ॥
कलकणत्सारसानि कलिन्दजासैकतानि ।
गलन्मरन्दाम्बुजानि मिलन्मरालावलीनि ॥ ३८ ॥
बालमृगीसङ्कुलानि तालतमालाङ्कितानि ।
नीलगलैरञ्चितानि शैलतटीकाननानि ॥ ३९ ॥
निकटगोवर्धनानि निखिलगोवर्धनानि ।
सुजनवृन्दावनानि सुभग! वृन्दावनानि ॥ ४० ॥
सर्वाण्येव संविहाय सर्वात्मा भवानपीह ।
निर्लीनो वसत्यतो हि निर्विण्णाः स्त्रियो भवन्ति ॥ ४१ ॥
प्रसीद प्रभो! मुकुन्द! सुसीदद् वनान्तरेषु ।
वधूनां कुलं समेत्य विधेहि प्रमोदमस्य ॥ ४२ ॥
इन्दुकुन्दमन्दहाससुन्दराननाम्बुजाय ।
नन्दगोपनन्दनाय सन्ततं नमो नमोऽस्तु ॥ ४३ ॥

सुरलोकरञ्जनाय सुरवैरिभञ्जनाय ।
नतिरस्तु कञ्जनाभ! भवते निरञ्जनाय ॥ ४४ ॥
नारायण! वासुदेव! नाथाजित! देवदेव! ।
नारीजनमादरेण नानागुणशील! पाहि ॥ ४५ ॥
इति स्तुहि शारिकेऽद्य जगत्पतिमेनमेत्य ।
प्रसत्स्यति माधवः स समेष्यति सद्य एव ॥ ४६ ॥
एहि सविधं कुरङ्गि! देहिजनमोहनाङ्गि! ।
ब्रूहि कुत आगतासि काहि तव वृत्तिरत्र ॥ ४७ ॥
तृणजलमात्रवृत्ति वनतलमध्यसुप्ति ।
प्रणयिजनावियुक्ति मृगकुलमेव साधु ॥ ४८ ॥
अस्मादृश्यो दयितेन विस्मर्यन्ते विरहेषु ।
दुःखायन्ते दुरितेन दुष्काले सत्यचिरेण ॥ ४९ ॥
सुखायन्ते सुकृतेन सुजन्मानो यदि सन्ति ।
सुकालश्चेदुपयाति स कालो नो न उपैति ॥ ५० ॥
न श्रुतं किं मृगशाब! विश्रुतं नो विपिनेषु ।
वैशसे यद् दयितेन वञ्चिता हा वयमद्य ॥ ५१ ॥
रतिलीलासमये स रमणो नो रभसेन ।
अपराधेन विनापि विपिनेऽस्मिंस्त्यजति स्म ॥ ५२ ॥
सारङ्ग! सारमवेहि दूरं गतेऽपि स एव ।
मारं स्वचारमिवात्र सारम्भमादिशति स्म ॥ ५३ ॥
अयं पुनः कलहाय दयां विना घटते च ।
शरोत्करैर्हृदयानि करोति नस्त्रुटितानि ॥ ५४ ॥

किं करवाम वयं तु किं कथयाम बतेह ।
कं शरणं च भजाम कं खलु देशमयाम ॥ ५५ ॥
मुरहराच्युत! कृष्ण! वरद! नाथ! मुकुन्द!
गरुडवाहन! देव! कुरु कृपामधुनैत्र ॥ ५६ ॥
योषाणामयि सुरेश! दोषाणां शतमपीह ।
क्षाम्य त्वं सकलमद्य काम्यत्वं दधदतीव ॥ ५७ ॥
वदन्तीरिति वनेषु वलन्तीरतिघनेषु ।
व्रजस्त्रीरनु तदा स कृपावानजनि तत्र ॥ ५८ ॥
मन्दहासकलितेन चन्द्रबिम्बतुलितेन ।
सान्द्रकान्तिसदनेन सुन्दरेण वदनेन ॥ ५९ ॥
करुणामृतमयेन कमलायतपुटेन ।
भयमोचनपरेण नयनाञ्चलयुगेन ॥ ६० ॥
नीलोपलमसृणेन लोलार्पितघुसृणेन ।
लक्ष्मीमणिभवनेन वक्षःस्थलफलकेन ॥ ६१ ॥
भुजङ्गवरनिभेन भुवोऽतिभरहरेण ।
वराभरणयुतेन कराम्बुरुहयुगेन ॥ ६२ ॥
काञ्चनवसनलम्बिकाञ्चिभिरतिशुभेन ।
शिञ्जितमणिघटेन मञ्जुलकटितटेन ॥ ६३ ॥
सुखकररुचिपूरनखमणिनिकरेण ।
सरसिजमृदुलेन पादतलयुगलेन* ॥ ६४ ॥

* मातृकायामिह दृष्टं तृतीयपरिच्छेदावसानवाक्यमस्थानपतितं स्यात्

वंशीनालीनादामृतधारानन्दह्लोकेन च ।
आविर्भूतो रूपेण स गोविन्दोऽसौ मोदेन च ॥ ६५ ॥

(इष्यानुष्टुप्प्रस्तारे तृतीयः परिच्छेदः ।)

---

## अथ चतुर्थः परिच्छेदः ।

कपोलफुल्लं नेत्राञ्चलकृताश्लेषं तोषादथ ।
मुकुन्दं तं दृष्ट्वाखिलव्रधूलोकेनोदश्वासि ॥ १ ॥
उल्ललद्धम्मिल्लाञ्चितमल्लिकामालासंहति ।
वल्लवीवृन्दं तन्निजवल्लभं प्राप्यावन्दत ॥ २ ॥
जगदे देवेनापि च जगदेकालम्बे मयि ।
कुपिताः किं यूयं बत कुहनाकर्मालम्बिनि ॥ ३ ॥
दुर्वारगर्वाविष्कृति दुर्बोधनिर्बाधादिह ।
युष्माकमन्तः किञ्चन मालिन्यमत्राजायत ॥ ४ ॥
तदेतदाहर्तुं खलु तदा तिरोभूतोऽस्मि हि ।
तथा न राधाजृम्भत ततो ह्यनैषं तामपि ॥ ५ ॥
सापि च दृप्ता किञ्चन संवह कण्ठे मामिति ।
यद्बूत तत्रावोचत तत् पुनरेषाप्यौज्झ्यत ॥ ६ ॥
विगतदोषाः सम्प्रति पशुपयोषाः! क्रीडत ।
सुखमशेषं विन्दत सुचिरमेवं नन्दत ॥ ७ ॥
श्रुत्वा तस्य वाणीमिति मुक्त्वा शोकदैन्यानि च ।
युक्तास्तेन गोप्योऽप्यनुरक्ताः केलिमारप्सत ॥ ८ ॥
नदन्ति काश्चित् काश्चन वदन्ति काश्चित् काश्चन ।
वसन्ति काश्चित् काश्चन हसन्ति काश्चित् काश्चन ॥ ९ ॥

गीयते कयाचिन्मधु पीयते कयाचित् खलु ।
तुष्यते कयाचिद् बहु रुष्यते कयाचित् किल ॥ १० ॥

तदिदं मनोमोहनचरितं हरेः सम्प्रति ।
अवलोकितुं चेतसि कुतुकं न किं वो बत ॥ ११ ॥

इत्यादि तदा नारदवाक्यानि समाकर्ण्य च ।
सत्राशनसङ्घा अपि तत्राययुराशूपरि ॥ १२ ॥

सचारणसिद्धा अपि सकिन्नरयक्षा अपि ।
सतापससाध्या अपि समाययुरेते दिवि ॥ १३ ॥

नारदमुनीन्द्रः स च पर्वतमुनीन्द्रोऽपि च ।
तुम्बुरुवसिष्ठौ भृगुकाश्यपपुलस्त्या अपि ॥ १४ ॥

कलकलगुञ्जत्पदकटकविभूषा दिवि ।
सुरवरयोषा अपि नटनमथाकुर्वत ॥ १५ ॥

वादंवादं मुदा मृदु वाद्यं माद्यत् तदा खलु ।
गायं गायं बताकृत नृत्तं नारीकुलं बहु ॥ १६ ॥

जय श्रीमन्! जनार्दन! जगन्नाथ! प्रसीद च ।
इति स्तुत्वा हरिं सुरततिर्व्यासा तदोपरि ॥ १७ ॥

वासुदेवो मनोहररासलीलारतोऽजनि ।
भासमानो मिलन्मृदुहासशोभी व्यरोचत ॥ १८ ॥

प्रतिगोपि व्यदृश्यत रतिशाली सुरैरथ ।
अतिमायो वनेषु च स तु पूर्णो व्यलोक्यत ॥ १९ ॥

वृक्षा लतास्तृणानि च वृन्दावने मृगा अपि ।
गोवर्धनादयोऽपि च गोविन्दतामधुः किल ॥ २० ॥

सकोपया कयाचन सलज्जया कयाचन ।
समोदया कयाचन सरोदया कयाचन ॥ २१ ॥
आगितया कयाचन हासितया कयाचन ।
स्थापितया कयाचन गोपितया कयाचन ॥ २२ ॥
सह वसन्नदृश्यत सह चरन्नदृश्यत ।
सह हसन्नदृश्यत बहुप्रियः स तत्र हि ॥ २३ ॥
नानाखेलनलालितनारीसंहतिना खलु ।
प्रीतेनाखिलचेतननाथेनालमरम्यत ॥ २४ ॥
कुचालिङ्गनचुम्बनकचामर्दमुखानि च ।
नखालेखनमोहनसुखालापशतानि च ॥ २५ ॥
नीवीमोचनसाहसभावितातिरसानि च ।
तानि तानि विनोदनताण्डवानि स चाकृत ॥ २६ ॥
मुरलीमृदुवादनतरलीकृतचेतसि ।
तरुणीजनसंसदि हरिणा समराज्यत ॥ २७ ॥
कामाकुलितमानसरामाजनमनोहृति ।
दामोदर इदं जगदामोदत तदा खलु ॥ २८ ॥
अमन्दसुखसन्तति समग्रशुभसङ्गति ।
समस्तविभवावलि जगत्रयमराजत ॥ २९ ॥
किन्नरमुनिचारणपन्नगविबुधा अथ ।
तुष्टुवुरखिला अपि तुष्टमतिममुं दिवि ॥ ३० ॥
जय जय जनार्दन ! जय जय जगन्मय ! ।
जय जय जनाश्रय ! जय जय हरे ! जय ॥ ३१ ॥

लोकानां नाथे भवति लोले लीलायां भवति ।
सर्वोऽयं लोको भवति सानन्दो गोपीभवति ॥ ३२ ॥

हयग्रीवाख्ये द्विषति निगूढं वेदान् हरति ।
महामत्स्योऽभूः सपदि महात्मन्! विष्णो! त्वमपि ॥ ३३ ॥

मन्दरं मग्नं पयसि मायया धर्तुं त्वमसि ।
कामठं रूपं झटिति भेजिवान् पूर्वं वरद! ॥ ३४ ॥

पृथिवीचोरं कमपि दनुजं हन्तुं तदनु ।
पृथुवाराहं न किमु धृतवान् रूपं त्वमयि! ॥ ३५ ॥

दैत्यो हिरण्यो जगति योऽभूद् दुरात्मा तमथ ।
हन्तुं नृसिंहत्वमपि हन्त त्वयाधारि किल ॥ ३६ ॥

जगत्त्रयं सर्वमपि पदत्रयेणैव खलु ।
हृतं त्वया माणवकवपुर्भृता मारमण! ॥ ३७ ॥

भार्गवरामस्त्वमथ भूमिभुजां वंशमपि ।
घोरकुठारार्चिषि न किं हुतवानप्रतिम! ॥ ३८ ॥

तदनु सीताहृदयकमलभानुस्त्वमपि ।
दशमुखं तं समिति निहतवान् किं न किल ॥ ३९ ॥

तालाङ्कोऽधुना त्वमसि नीलाङ्काम्बरो जगति ।
हालां कामिनीरपि च लीलां कारयन् भजसि ॥ ४० ॥

यशोदात्मजस्त्वमसि यशोभाजनं किमपि ।
सुशोभानिधे! कमलविशालाक्ष! हे सुभग! ॥ ४१ ॥

खड्गपाणिना तुरगपृष्ठवासिना वरद! ।
कल्किना त्वया जगति सम्भविष्यते सपदि ॥ ४२ ॥

अवतारजातमिह भवता कृतं हि किल ।
भवतापिनां जगति भविता हिताय खलु ॥ ४३ ॥
लोकाधिपते! विधुरलोकाधिहृते भवतु ।
नाथाय नमो विमतमाथाय च ते सुमुख! ॥ ४४ ॥
इति स्तुतचारुगुणनिधिस्त्रिदशैः स खलु ।
वधूनिकरेण सह मघोर्दमितारमत ॥ ४५ ॥
मञ्जुतरकेलिरसरञ्जितवधूविततिं ।
गुञ्जदलिनीसरसकुञ्जतलवासरति ॥ ४६ ॥
कलमृदुवेणुरवपुलकितसर्वतनु ।
गलरवदूरजितकलगलगीतततिं ॥ ४७ ॥
रासक्रीडासुखमिति मासान् रम्यान् कतिचन ।
गोपीजालैः सह किल गोविन्दोऽसावतनुत ॥ ४८ ॥
प्रभातायामथ निशि शुभाकारो हरिरपि ।
कदाचित् ता अवदत मुदा गोपीरिति किल ॥ ४९ ॥
यामिनीयं विरमति यात यूयं द्रुतमिह ।
कामितानां शतमपि साधितं यत् स्वयमपि ॥ ५० ॥
मिहिरोऽसावुदयति स हि किञ्चित् प्रतपति ।
तिमिरौघं तिरयति हिमबाधां शमयति ॥ ५१ ॥
अम्भोजिनीं करचयसम्भावितां मृदु मृदु ।
फुल्लाननां कलयति सल्लीलया विट इव ॥ ५२ ॥
सकुङ्कुमैरिव निजकरोत्करैर्दीशि दिशि ।
विलेपनं रचयति विलासवानयमपि ॥ ५३ ॥

चक्रवधूकुलमपि शक्रहरिन्मुखमनु ।
दत्तविलोचनमथ चित्तमुदं प्रभजति ॥ ५४ ॥
विघटितं तदपि हि सुघटितं समजनि ।
सकलकोकयुगलनिकरमाकलयत ॥ ५५ ॥
भृङ्गाणां विततिरपि झङ्कारैर्मुखरयति ।
सर्वाशावलयमिह सम्प्रीता विचरति च ॥ ५६ ॥
विनिद्रः करिकलभसमूहो विपिनभुवि ।
समुत्तिष्ठति सपदि समुद्भ्राम्यति च दिशि ॥ ५७ ॥
आकुलं पतिभिरथ गोकुलं प्रति सरत ।
शोभनं दिनमपि च लोभनं ननु भवतु ॥ ५८ ॥
इति ताः पशुपकुलतरुणीरवददथ ।
अगमन्निजमपि च भगवान् भवनमपि ॥ ५९ ॥
लीलारमितपशुपबालाविततिरपि च ।
कृष्णोऽनिशमपि खलु पुष्णातु व इह भुवि ॥ ६० ॥
इदं सकलमनुजमुदं प्रविरचयतु ।
यथासुखमिह हरिकथामृतमनवधि ॥ ६१ ॥
मङ्गलमानिशमपि भङ्गविरहितमिह ।
सङ्कलयतु मम तु सम्प्रति हरिरवतु ॥ ६२ ॥
हरिपदसरसिजयुगमनुदिनमपि ।
मम हृदि निवसतु शममपि जनयतु ॥ ६३ ॥

इत्यनुष्टुप्प्रस्तारे चतुर्थः परिच्छेदः ॥

भ्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥

कलकलकाञ्चीकङ्कणजालं
मधुराविहारं मानसचोरम् ।
कमपि पुमांसं कामसमानं
नवघननीलं बालमुपासे ॥

इति रामपाणिवादविरचितमनुष्टुप्प्रकरणं समाप्तम् ॥

---

स्मरान्धकारघस्मरं स्मरान्तकस्य विग्रहम् ।
स्मरान्तरान्तरा मनः स्थिरं तदेव नापरम् ॥ १ ॥

नष्टस्य यो भवेदङ्कस्तस्यार्धेऽर्धे समे च लः ।
विषमे चैकमादाय तस्यार्धेऽर्धे गुरुर्भवेत् ॥ २ ॥

उद्दिष्टं द्विगुणेनाद्यादुपर्यङ्कान् समालिखेत् ।
लघुस्था ये तु तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत् ॥ ३ ॥

वर्णान् वृत्तभवान् सैकानौत्तराधर्यतः स्थितान् ।
एकादिक्रमशश्चैतानुपर्युपरि निक्षिपेत् ॥ ४ ॥

उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः ।
उपर्याद्याद् गुरोरेवमेकद्व्यादिलगक्रिया ॥ ५ ॥

लगक्रियाङ्कसन्दोहे भवेत् सङ्ख्या विमिश्रिते
उद्दिष्टाङ्कसमाहारः सैको वा जनयेदिमाम् ॥ ६

यदुभर्ता श्रीकृष्णस्तद्धनवान् जातसारोऽलम् ।
भुवि परतरो रणे कः साधुनरश्चापरथससूतो यः ॥ ७ ॥

क्षेमेन्द्रः श्रीकृष्णो वीरनृपो देवनप्रज्ञः ।
तद्धनवान् प्रलयादिर्भुजगत्रयो जातसारोऽलम् ॥ ८ ॥
तिलमश्रुचिरसौ कलया भावपरं चारुदर्दुरविरामः ।
तुच्छमदाभिज्ञोऽयं श्रीमान्यः साधनप्रज्ञः ॥ ९ ॥
वनं गत्वाधिकं भग्नो दीनस्तद्देहगो जनः ।
चापी रथी ससूतो यः प्राग(म ? भूद्) भूमिमण्डले ॥ १० ॥
भाति ददानः कथितं हरिसच्छायः प्रभुर्लोके ।
इयमेव सप्तविंशत्यन्ता सङ्ख्याष्टतः समासाद्य ॥ ११ ॥
पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः ।
यथोपरि तथा शेषं भूयः कुर्यादमुं विधि- ॥ १२ ॥
ऊने दद्याद् गुरूनेव यावत् सर्वलघुर्भवेत् ।
प्रस्तारोऽयं समाख्यातश्छन्दोविचीतिवेदिभिः ॥ १३ ॥

शुभं भूयात्

# श्लोकानुक्रमणिका।


| श्लोकः. | पृष्ठम्. | श्लोकः. | पृष्ठम् |
|---|---|---|---|
| अखिलतनु | २१ | कलकलमुख | २२ |
| अखिलरसानामविकल | १६ | कामबाण | २६ |
| अङ्घ्र्यो यस्य | ३ | किमपि किमपि | २२ |
| अथ जाम्बवदङ्गद | १६ | कोटीरे वहते | ३० |
| अथ वासवस्य | ३० | क्षणमपि विरहः | २८ |
| अथात्मनः शब्द | ९ | गङ्गाफणिमाला | १७ |
| अथोपगूढे शरदा | १० | गोपालबालस्य | १५ |
| अनन्तरत्नप्रभव | ,, | गोरसं चोर | १८ |
| अन्यगुणौघे | ७ | जगाद चैनामय | ११ |
| अपि लोकयुगं | २८ | जनयति त्वयि | १५ |
| अभून्नृपो विबुध | २० | जयति गुणनिधि | १९ |
| अयुगोजाख्यं | ५ | णमह अवंढिअ | ३३ |
| अरुणौ चरणौ | २७ | तं भूपतिर्भासुर | ११ |
| अस्त्युत्तरस्यां दिशि | १० | तन्वी बाला | २४ |
| आकीटमाकैटभ | ९ | तमध्वरे विश्व | १० |
| आकृत्यादावप्रयोग | ४ | तरुणतमाल | २३ |
| इति स्वसुर्भोज | १२ | तावदित्थमथ | १४ |
| इत्थममुं विल | १३ | त्रिस्रस्त्रिलोक | १२ |
| उक्तात्युक्ता | ४ | दशमुखकुल | ,, |
| उज्ज्वलकनक | ३३ | द्रविणं तरुणी | २९ |
| उत्तुङ्गास्तुङ्ग | २५ | घनजनयौवत | १८ |
| उदयति शशिमुखि | ३० | घनाभोगोन्मत्ता | २५ |
| उवह मुद्दाइ | ३३ | नमत नवाम्बु | १७ |
| एकद्वेपनाद्दत्य | ६ | नैव नः प्रियतमो | १४ |
| कलकलकाञ्ची | १४ | परिपाण्डुदुर्बल | २० |

| श्लोकः. | पृष्ठम्. |
|---|---|
| पाण्ड्योऽयमंसा | ११ |
| पादे सर्वगुरा | ४ |
| पूर्वानुभूतं | ९ |
| प्रचेतसा मे | ११ |
| प्रथमाङ्घ्रिसमो | ३ |
| प्रदिशतु गिरिश | ३४ |
| प्रिये ! जनकनन्दिनि ! | २३ |
| प्लवङ्गमवीरा | १६ |
| बन्धाढ्यनाना | ९ |
| बहिः सर्वाकार | २३ |
| मञ्जुलवञ्चुल | २७ |
| मधुरं वीणा | ३३ |
| मध्येमार्गं मत्त | २० |
| मम हृदये | १३ |
| मलिनश्वपलाश | २८ |
| मुरारातेर्वक्षो | २० |
| मृगपरशुधरं | १८ |
| यतिभिररहिते | ,, |
| यस्य पादचतुष्के | ३ |
| रघुपतिरपि | २४ |
| रुचिराकृतिः कनक | १७ |
| रुद्राद्रिसमुद्रादि | ७ |
| लक्ष्मीपतये | २९ |
| लीलारामे | ७ |
| लोकेशकेशव | ३१ |
| वंशनिनादै | १४ |
| वाणि ! त्वत्पद | २५ |
| वारवधूकेलि | ७ |
| विद्युन्मालालोलान् | ६ |
| वीचीवातैः | १३ |
| वेदा वाचः प्रस | ५ |
| व्रजति कुमुदे | २३ |
| शश्वदुदयस्थिति | २१ |
| श्यामावदात | ,, |
| श्रियः पतिः | १५ |
| श्लोकेषु नियत | ५ |
| सकृदपि मज्जन | १९ |
| सत्रान्ते सचिव | ,, |
| सप्तच्छदक्षीर | ११ |
| सरागसुमना | १७ |
| सरोजिनभिानस | ८ |
| सानुस्वारो | २ |
| सुरभिलवन | २८ |
| स्तनयुगमश्रु | ३३ |
| स्मरान्धकारघस्मरं | ६ |
| स्वच्छन्दैकस्तन | २६ |
| हरिपदाम्बुजा | ८ |
| हिमशैलसुता | २७ |

# LIST OF SANSKRIT PUBLICATIONS FOR SALE.

| | RS. | AS. | P. |
|---|---|---|---|
| भक्तिमञ्जरी **Bhaktimanjari** (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja. | 1 | 0 | 0 |
| स्यानन्दूरपुरवर्णनप्रबन्धः **Syanandurapuravarnana-prabandha** (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rājarāja Varma Koil Tampurān. | 2 | 0 | 0 |

## Trivandrum Sanskrit Series.

| | RS. | AS. | P. |
|---|---|---|---|
| No. 1—दैवम् **Daiva** (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*). | 1 | 0 | 0 |
| No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ **Abhinavakaustubhamala and Daksinamurtistava** by Kṛṣṇalīlāśukamuni (*out of stock*). | 0 | 2 | 0 |
| No. 3—नलाभ्युदयः **Nalabhyudaya** (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*). | 0 | 4 | 0 |
| No. 4—शिवलीलार्णवः **Sivalilarnava** (Kāvya) by Nīlakaṇṭa Dīkṣita (*out of stock*). | 2 | 0 | 0 |
| No. 5—व्यक्तिविवेकः **Vyaktiviveka** (Alaṅkāra) by Mahima-Bhaṭṭa with commentary (*out of stock*). | 2 | 12 | 0 |
| No. 6—दुर्घटवृत्तिः **Durghatavrtti** (Vyākaraṇa) by Śaraṇadeva (*out of stock*). | 2 | 0 | 0 |
| NO. 7—ब्रह्मतत्त्वप्रकाशिका **Brahmatattvaprakasika** (Vedānta) by Sadāśivendrasarasvatī (*out of stock*). | 2 | 4 | 0 |
| No. 8—प्रद्युम्नाभ्युदयम् **Pradyumnabhyudaya** (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*). | 1 | 0 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 9—विरूपाक्षपञ्चाशिका **Virupaksapancasika** (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*). | 0 | 8 | 0 |
| No. 10—मातङ्गलीला **Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*). | 0 | 8 | 0 |
| No. 11—तपतीसंवरणम् **Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*). | 2 | 4 | 0 |
| No. 12—परमार्थसारम् **Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*). | 0 | 8 | 0 |
| No. 13—सुभद्राधनञ्जयम् **Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*). | 2 | 0 | 0 |
| No. 14—नीतिसारः **Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*). | 3 | 8 | 0 |
| No. 15—स्वप्नवासवदत्तम् **Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*). | 1 | 8 | 0 |
| No. 16—प्रतिज्ञायौगन्धरायणम् **Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 8 | 0 |
| No. 17—पञ्चरात्रम् **Pancaratra** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 0 | 0 |
| No. 18—नारायणीयम् **Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*second edition*). | 4 | 0 | 0 |
| No. 19—मानमेयोदयः **Manameyodaya** (Mīmāṃsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*). | 1 | 4 | 0 |
| No. 20—अविमारकम् **Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 8 | 0 |
| No. 21—बालचरितम् **Balacarita** (Nāṭaka) by Bhāsa (*out of stock*) | 1 | 0 | 0 |

| | Rs. | As. | P. |
|---|---|---|---|
| No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारो-रुभङ्गानि **Madhyamavyayoga-Duta-vakya-Dutaghatotkaca-Karna-bhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 8 | 0 |
| No. 23—नानार्थार्णवसंक्षेपः **Nanartharnavasam-ksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*). | 1 | 12 | 0 |
| No. 24—जानकीपरिणयः **Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*). | 1 | 0 | 0 |
| No. 25—काणादसिद्धान्तचन्द्रिका **Kanadasiddhanta-candrika** (Nyāya) by Gaṅgādhara-sūri (*out of stock*). | 0 | 12 | 0 |
| No. 26—अभिषेकनाटकम् **Abhisekanataka** by Bhāsa (*out of stock*). | 0 | 12 | 0 |
| No. 27—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*). | 1 | 12 | 0 |
| No. 28—वैखानसधर्मप्रश्नः **Vaikhanasadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*). | 0 | 8 | 0 |
| No. 29—नानार्थार्णवसंक्षेपः **Nanartharnavasam-ksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*). | 2 | 4 | 0 |
| No. 30—वास्तुविद्या **Vastuvidya** (Śilpa) (*out of stock*). | 0 | 12 | 0 |
| No. 31—नानार्थार्णवसंक्षेपः **Nanartharnavasam-ksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas). | 1 | 0 | 0 |
| No. 32—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part II, 3rd, 4th and 5th Sargas) (*out of stock*). | 2 | 8 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 33—वाररुचसंग्रहः **Vararucasangraha** (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*). | 0 | 8 | 0 |
| No. 34—मणिदर्पणः **Manidarpana** (Nyāya) by Rājacūḍāmaṇimakhin. | 1 | 4 | 0 |
| No. 35—मणिसारः **Manisara** (Nyāya) by Gopīnātha. | 1 | 8 | 0 |
| No. 36—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas). | 3 | 0 | 0 |
| No. 37—आशौचाष्टकम् **Asaucastaka** (Smṛti) by Vararuci with commentary. | 0 | 4 | 0 |
| No. 38—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa). | 2 | 0 | 0 |
| No. 39—चारुदत्तम् **Carudatta** (Nāṭaka) by Bhāsa (*out of stock*). | 0 | 12 | 0 |
| No. 40—अलङ्कारसूत्रम् **Alankarasutra** by Rājānaka Ruyyaka with the Alaṅkārasarvasva of Mankhūka and its commentary by Samudrabandha (*second edition*). | 2 | 8 | 0 |
| No. 41—अध्यात्मपटलम् **Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Śaṅkara-Bhagavat-Pāda (*out of stock*). | 0 | 4 | 0 |
| No. 42—प्रतिमानाटकम् **Pratimanataka** by Bhāsa (*out of stock*). | 1 | 8 | 0 |
| No. 43—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas). | 2 | 8 | 0 |
| No. 44—तन्त्रशुद्धम् **Tantrasuddha** by Bhaṭṭāraka Vedottama (*out of stock*). | 0 | 4 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 45—प्रपञ्चहृदयम् **Prapancahrdaya.** | 1 | 0 | 0 |
| No. 46—परिभाषावृत्तिः **Paribhasavrtti** (Vyākaraṇa) by Nīlakaṇṭa Dīkṣita. | 0 | 8 | 0 |
| No. 47—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.) | 1 | 12 | 0 |
| No. 48—सिद्धान्तसिद्धाञ्जनम् Do. Do. (Part II). | 2 | 0 | 0 |
| No. 49—गोलदीपिका **Goladipika** (Jyotiṣa) by Parameśvara. | 0 | 4 | 0 |
| No. 50—रसार्णवसुधाकरः **Rasarnavasudhakara** (Alaṅkāra) by Singa Bhūpāla. | 3 | 0 | 0 |
| No. 51—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas). | 2 | 0 | 0 |
| No. 52—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghaṭîya Sarvânanda (Part IV, 3rd Kâṇḍa). | 1 | 8 | 0 |
| No. 53—शाब्दनिर्णयः **Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra. | 0 | 12 | 0 |
| No. 54—स्फोटसिद्धिन्यायविचारः **Sphotasiddhinyayavicara** (Vyâkaraṇa). | 0 | 4 | 0 |
| No. 55—मत्तविलासप्रहसनम् **Mattavilasaprahasana** (Nâṭaka) by Mahendravikramavarman. (*out of stock*). | 0 | 8 | 0 |
| No. 56—मनुष्यालयचन्द्रिका **Manusyalayacandrika** (Śilpa) (*out of stock*). | 0 | 8 | 0 |
| No. 57—रघुवीरचरितम् **Raghuviracarita** (Kâvya). | 1 | 4 | 0 |
| No. 58—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatî (Part III). | 2 | 0 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 59—नागानन्दम् **Nagananda** (Nâṭaka) by Harṣadeva with the commentary Vimarśinī of Śivarâma (*out of stock*). | 3 | 4 | 0 |
| No. 60—लघुस्तुति: **Laghustuti** by Laghubhaṭṭâraka with the commentary of Râghavânanda. | 0 | 8 | 0 |
| No. 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatī (Part IV). | 1 | 4 | 0 |
| No. 62—सर्वमतसंग्रह: **Sarvamatasangraha.** (*out of stock*). | 0 | 8 | 0 |
| No. 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhāravi with the commentary Śabdārthadīpika of Citrabhânu (1, 2 and 3 Sargas). | 2 | 8 | 0 |
| No. 64—मेघसन्देश: **Meghasandesa** by Kālidāsa with the commentary Pradīpa of Dakṣiṇâvartanâtha. | 0 | 12 | 0 |
| No. 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*). | 3 | 4 | 0 |
| No. 66—महार्थमञ्जरी **Maharthamanjari** (Darśana) with the commentary Parimala of Maheśvarânanda. | 2 | 4 | 0 |
| No. 67—तन्त्रसमुच्चय: **Tantrasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara (Part I, 1–6 Paṭalās) (*out of stock*). | 3 | 4 | 0 |
| No. 68—तत्त्वप्रकाश: **Tattvaprakasa** (Āgama) by Śrī Bhojadeva with the commentary Tâtparyadīpikā of Śrī Kumāra | 1 | 12 | 0 |
| No. 69—ईशानशिवगुरुदेवपद्धति: **Isanasivagurudevapaddhati** (Tantra) by Iśânaśivagurudevamiśra Part I, Sâmânyapâda). | 1 | 8 | 0 |
| No. 70—आर्यमञ्जुश्रीमूलकल्प: **Aryamanjusrimulakalpa** (Part I). | 2 | 8 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 71—तन्त्रसमुच्चय: **Tantrasamuccaya**(Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara(Part II, 7—12 Paṭalās) (*out of stock*). | 3 | 8 | 0 |
| No. 72—ईशानशिवगुरुदेवपद्धति: **Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part II. Mantrapāda). | 4 | 0 | 0 |
| No. 73—ईश्वरप्रतिपत्तिप्रकाश: **Isvarapratipattiprakasa** (Vedānta) by Madhusūdanasarasvatī. | 0 | 4 | 0 |
| No. 74—याज्ञवल्क्यस्मृति: **Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya. (Part I — Âcâra and Vyavahâra Adhyâyās). | 3 | 4 | 0 |
| No. 75—शिल्परत्नम् **Silparatna** (Śilpa) by Śrīkumâra (Part I). | 2 | 12 | 0 |
| No. 76—आर्यमञ्जुश्रीमूलकल्प: **Aryamanjusrimulakalpa** (Part II). | 3 | 0 | 0 |
| No. 77—ईशानशिवगुरुदेवपद्धति: **Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās). | 3 | 0 | 0 |
| No. 78—आश्वलायनगृह्यसूत्रम् **Asvalayanagrhyasutra** with the commentary Anāvilā of Haradattācārya. | 2 | 6 | 0 |
| No. 79—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I, 1 & 2 Adhikaraṇās). | 3 | 12 | 0 |
| No. 80—अर्थशास्त्रम् **Do.** Do. (Part II, 3—7 Adhikaraṇās). | 4 | 0 | 0 |
| No. 81—याज्ञवल्क्यस्मृति: **Yajnavalkyasmrti** with the commentary Bâlakrīḍa of Viśvarūpācārya (Part II. Prâyaścittâdhyâya). | 2 | 0 | 0 |
| No. 82—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part III, 8—15 Adhikaraṇās). | 3 | 4 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 83—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part IV, Kriyāpāda 31–64 Paṭalās and Yogapāda). | 3 | 8 | 0 |
| No. 84—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part III). | 2 | 0 | 0 |
| No 85—विष्णुसंहिता **Visnusamhita** (Tantra). | 2 | 8 | 0 |
| No. 86—भरतचरितम् **Bharatacarita** (Kâvya) by Kṛṣṇakavi. | 1 | 8 | 0 |
| No. 87—सङ्गीतसमयसारः **Sangitasamayasara** (Saṅgīta) of Saṅgītâkara Pârśvadeva. | 1 | 2 | 0 |
| No. 88—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkâra) of Mammaṭabhaṭṭa with the two commentaries the Sampradāyaprakāśinī of Śrī Vidyācakravartin and the Sâhityacūḍâmaṇi of Bhaṭṭagopâla (Part I, 1–5 Ullâsās). | 3 | 0 | 0 |
| No. 89—स्फोटसिद्धिः **Sphotasiddhi** (Vyākaraṇa) by Bharatamiśra. | 0 | 8 | 0 |
| No. 90—मीमांसाश्लोकवार्त्तिकम् **Mimamsaslokavartika** with the commentary Kāśikā of Sucaritamiśra (Part I). | 2 | 8 | 0 |
| No. 91—होराशास्त्रम् **Horasastra** of Varāhamihirācārya with the Vivaraṇa of Rudra. | 3 | 0 | 0 |
| No. 92—रसोपनिषत् **Rasopanisat.** | 2 | 0 | 0 |
| No. 93—वेदान्तपरिभाषा **Vedantaparibhasa** (Vedānta) of Dharmarājādhvarīndra with the commentary Prakāśikā of Peddādīkṣita. | 1 | 8 | 0 |
| No. 94—बृहद्देशी **Brihaddesi** (Saṅgīta) of Mataṅgamuni. | 1 | 8 | 0 |
| No. 95—रणदीपिका **Ranadipika** (Jyotiṣa) of Kumāragaṇaka. | 0 | 4 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 96—ऋक्संहिता **Rksamhita** with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, 1st Adhyāya in 1st Aṣṭaka). | 1 | 8 | 0 |
| No. 97—नारदीयमनुसंहिता **Naradiyamanusamhita** (Smṛti) with Bhāṣya of Bhavasvāmin. | 2 | 0 | 0 |
| No. 98—शिल्परत्नम् **Silparatna** (Śilpa) by Śrīkumāra. (Part II.) | 2 | 8 | 0 |
| No. 99—मीमांसाश्लोकवार्त्तिकम् **Mimamsasloka-vartika** (Mīmāmsā) with the commentary **Kāśikā** of Sucaritamiśra (Part II). | 2 | 0 | 0 |
| No. 100—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkāra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāśinī of Śrīvidyācakravartin and Sāhityacūḍāmaṇi of Bhaṭṭagopāla. (Part II, 6–10 Ullāsās). | 5 | 0 | 0 |
| No. 101—आर्यभटीयम् **Aryabhaṭīya** (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan (Part I. Gaṇitapāda). | 2 | 8 | 0 |
| No. 102—दत्तिलम् **Dattila** (Saṅgīta) of Dattilamuni. | 0 | 4 | 0 |
| No. 103—हंससन्देशः **Hamsasandesa** (Vedānta) with commentary. | 0 | 8 | 0 |
| No. 104—साम्बपञ्चाशिका **Sambapancasika** (Stuti) with commentary. | 1 | 0 | 0 |
| No. 105—निधिप्रदीपः **Nidhipradipa** of Siddhaśrikaṇṭhaśambhu. | 0 | 4 | 0 |
| No. 106—प्रक्रियासर्वस्वम् **Prakriyasarvasva** (Vyākaraṇa) of Śrī Nārāyaṇa Bhatta with commentary (Part I.) | 1 | 0 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 107—काव्यरत्नम् **Kavyaratna** (Kāvya) of Arhaddāsa | 0 | 12 | 0 |
| No. 108—बालमार्ताण्डविजयम् **Balamartanda-vijaya** (Nāṭaka) of Devarājakavi. | 1 | 8 | 0 |
| No. 109—न्यायसारः **Nyayasara** with the commentary of Vāsudevasūri. | 1 | 8 | 0 |
| No. 110—आर्यभटीयम् **Aryabhatiya** (Jyotiṣā) of Āryabhaṭacārya with the Bhāṣya of Nīlakaṇṭhasomasutvan.(Part II. Kālakriyāpāda) | 1 | 0 | 0 |
| No. 111—हृदयप्रियः **Hridayapriya** (Vaidyaka) by Parameśvara. | 3 | 0 | 0 |
| No. 112—कुचेलोपाख्यानम् अजामिलोपाख्यानं च। **Kucelopakhyana and Ajamilo-pakhyana** (Saṅgīta) by H. H. Svāti Śrī Rāma Varma Mahārāja. | 0 | 4 | 0 |
| No. 113—सङ्गीतकृतयः **Sangitakrtis** (Gāna) of H. H. Svāti Śrī Rāma Varma Mahārāja. | 1 | 0 | 0 |
| No. 114—साहित्यमीमांसा **Sahityamimamsa** (Alaṅkāra) | 1 | 0 | 0 |
| No. 115—ऋक्संहिता **Rksamhita** (with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya) (Part II 2nd Adhyāya in Ist Aṣṭaka.) | 1 | 8 | 0 |
| No. 116—वाक्यपदीयम् **Vakyapadiya** (Vyākaraṇa) with the commentary Prakīrṇakaprakāśa by Helarāja son of Bhūtirāja. (Part I). | 1 | 8 | 0 |
| No. 117—सरस्वतीकण्ठाभरणम् **Sarasvatikanta-bharana** (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha. | 1 | 8 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 118—बालरामभरतम् **Balaramabharata** (Nāṭya) by Bālarāma Varma Vanci Maharaja. | 2 | 8 | 0 |
| No. 119—विवेकमार्तण्डः **Vivekamarthanda** (Vedānta) of Viśvarūpadeva | 0 | 8 | 0 |
| No. 120—शौनकीयम् **Saunakiya.** | 0 | 8 | 0 |
| No 121—वैखानसागमः **Vaikhanasagama** (Tantra) of Marīci. | 2 | 0 | 0 |
| No. 122- प्रबोधचन्द्रोदयम् **Prabodhacandrodaya** (Nāṭaka) by Kṛṣṇamiśrayati with the commentary Nāṭakābharaṇa of Śrī Govindāmṛtabhagavān. | 2 | 0 | 0 |
| No. 123—सङ्ग्रामविजयोदयः **Sangramavijayodaya** (Jyotiṣa). | 2 | 0 | 0 |
| No. 124—हरमेखला **Haramekhala** of Mahuka with commentary (Part I chapters 2, 3 & 4) | 1 | 8 | 0 |
| No. 125—कोकसन्देशः **Kokasandesa** (Kāvya) by Viṣṇutrātā. | 0 | 8 | 0 |
| No. 126—करणपद्धतिः **Karanapaddhati** (Jyotiṣa). | 0 | 4 | 0 |
| No. 127—सरस्वतीकण्ठाभरणम् **Sarasvatikanthabharana** by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha. | 1 | 8 | 0 |
| No. 128—भृङ्गसन्देशः **Bhringasandesa** (Kāvya) by Vāsudeva. | 0 | 6 | 0 |
| No. 129—हंससन्देशः **Hamsasandesa** (Kāvya) | 0 | 4 | 0 |
| No. 130—महानयप्रकाशः **Mahanayaprakasa.** | 0 | 8 | 0 |
| No. 131—वृत्तवार्त्तिकम् **Vrttavartika** | 1 | 8 | 0 |

***Apply to:—***

*The Superintendent,*
*Government Press,*
*Trivandrum.*